Patanjali
Mahabhasyapradipodyotah

PK
531
A15
1899
v.1
pt.1



UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

Mahabharata Pradipadyot.

Vol i Fas I- IX



VEI

महाभाष्यप्रदीपोद्योतः ॥

नत्वा साम्बशिवं देवीं वागधिष्ठानिकां गुरून् ।
पाणिन्यादिमुनीन् वन्द्यान्पितरौच सतीशिवौ ॥ १ ॥
नागेशभट्टो नागेशभाषितार्थविचक्षणः ।
हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः ॥ २ ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
[1]शृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥ ३ ॥
नाविस्तीर्णं न विस्तीर्णं मध्यानामपि बोधकृत् ।
भाष्यप्रदीपव्याख्यानं कुर्वेऽहं तु यथामति ॥ ४ ॥

भाष्यं व्याचिकीर्षुः शिष्टाचारप्राप्तं मङ्गलं शिष्यशिक्षायै निबध्नाति **सर्वेति** । क्लान्तानां पञ्चमश्लोकोत्तरार्द्धेनान्वयः ॥ सर्वाकारत्वं सर्वोपादानकारणत्वात् । मृदादिवत् । कार्य्यातिरिक्तदृश्यस्वरूपाभावान्निराकारत्वम् । कर्तृत्वाद्विश्वाधच्चत्वम् । **स ऐक्षतेति** श्रुतेः । अतीन्द्रियत्वं विगतेन्द्रियत्वेन । पश्यत्यचक्षुरित्यादिश्रुतेः । सर्वप्रत्यक्षीकरणं तु स्वरूपचैतन्येनैव । इन्द्रियाविषयत्वेनवातीन्द्रियत्वम् । सदसद्रूपता । प्रपञ्चधर्मः । एतच्च स्त्रियामिति सूत्रे वक्ष्यते । तामतीतम् । तद्रहितमित्यर्थः । एवञ्च सदेवेति भावः । नन्वीदृग्मस्माभिः कुतो न गृह्यत इत्यत आह **अदृश्यमित्यादि** ॥ १ ॥

---

१ शृङ्गवेरपुराधीशरामतः ॥ क ।

मायायावृतैरित्यस्य कृत्यमाह **ज्ञानेति** । [१]तत्त्वमस्यादिवाक्यजनिताखण्डाद्वितीयसच्चिदानन्दब्रह्माकारावृत्तिर्ज्ञानम् । तदेव लोचनं तेन संप्रेक्ष्यमित्यर्थः **नारायणमित्यादि** । सर्वनरसमूहान्तर्यामिणमित्यर्थः । सर्वविद्यावेदरूपा तद्विधायिनम् ॥२॥ वचनसन्दर्भविशेषरूपे ग्रन्थे समुचितत्वाद्वागधिदेवतां नमति । **पुरुषा इति । देवत्वम्** । पाण्डित्यम् ॥३॥ सम्प्रदायशुद्धिं द्योतयन् गुरुं नमति । **पदेति** । व्याकरणमीमांसातर्काणामित्यर्थः ॥ **धीमतः** । ऊहापोहकुशलस्य ॥४॥ **महाभाष्येति** । व्याख्यात्वेऽप्यस्येष्ट्यादिकथनेनाव्याख्यात्वादितरभाष्यवैलक्षण्येन महत्त्वम् ॥ अवारपारयोर्भवम् ॥ प्लूयतेऽनेनेति प्लवः [२]सेतुः ॥ **यथागमम्** । सम्प्रदायमनतिलङ्घ्येत्यर्थः ॥५॥ औद्धत्यं परिहरति **भाष्येति** । मयूरव्यंसकादिसमासो रूपकञ्चेति बोध्यम् । पिशुनत्वं दुष्टत्वम् ॥६॥ नन्वेवं कथं प्रवृत्तिरत आह **तथापीति** । तत्त्यसारांश एवात्र निबद्ध इति भावः । अनैरित्यनेनात्यन्तग्रन्थासंकोचः । पङ्गुवदित्यनेन व्याख्येयांशापरित्यागो व्याख्यानस्याविस्तृतत्वंच बोध्यते ॥७॥ यद्यपि पाणिनिना ब्राह्मणेन निष्कारण इत्यादिश्रुतेः संध्योपासनादाविव प्रत्यवायपरिहारार्थितयैवोक्तमाधिकारिप्रवृत्तिसंभवात् प्रयोजनं नोक्तं वार्त्तिककृतापि शास्त्रपूर्वकप्रयोगे धर्म इत्यनेन मध्यमाधिकारिणः परमप्रयोजनं दर्शितम् भगवांस्तु विवरणकारत्वान्मन्दाधिकारिणां प्रवृत्तेः प्ररोचकप्रयोजनप्रतिपत्तिप्रवणत्वाद्व्युत्पत्तिलक्षणं

१ तत्त्वमस्यादिमहावाक्य ॥ क ॥ २ प्लवं सेतुम् ॥ क ॥ ख ॥

वदतीत्याह **भाष्यकार इति**। तच्च शब्दज्ञानरूपे प्रयोजने उक्ते विषयोपयुक्त एव शास्त्रजन्यज्ञानविषयस्यैव शास्त्रविषयत्वादिति बोध्यम्। तज्ज्ञिज्ञासुरधिकारी। प्रतिपाद्यप्रतिपादकभावसम्बन्ध इत्यर्थादेवलब्धम्॥ ननु कानि पुनरित्यादिना प्रयोजनानि वक्ष्यति तेन पौनरुक्त्यमत आह **साक्षादिति** तदेवाह **प्रयोजन-प्रयोजनानीति**॥ **व्याख्यातुमि**त्यस्य शब्दानुशासनमित्यादिनेति शेषः॥ **तावत्** प्रथमम्। **व्याचष्टे इति** पदार्थज्ञानायानन्तर्यार्थकत्वनिरासायचेति शेषः। भाष्यत्वादेवच स्ववाक्यव्याख्यानमिति भावः॥ नन्विति विनाप्यथशब्दोऽधिकारार्थ इत्येवोच्यतामत आह **एवं हीति**॥ पदान्तरैः शब्दपदाधिकारार्थपदप्रयुज्यत इति पदैः॥ **व्याख्यातुमिति**। अधिकारार्थत्वेनेति शेषः॥ अथेतिशब्दोऽधिकारार्थ इत्युक्ते आनन्तर्यार्थकत्वमप्रमाणमिति भाष्येदतोऽयमिति भाष्ये योऽयमस्मिन् वाक्ये स इत्यर्थः॥

विस्पष्टेति नवेतीत्यादावर्थपरतायां दर्शनेन तथा भ्रमं निवर्त्तयितुमित्यर्थः॥ ननु निपातानां द्योतकत्वादभिधेयवाच्यर्थशब्दोऽनुपपन्नोऽत आह **अधिकार इति**॥ **प्रस्ताव इति** प्रारम्भ इत्यर्थः। सचार्थाद्व्याख्यायमानस्य। अर्थशब्दः प्रयोजनवाचीति भावः॥ **निपातानां च द्योतकत्वमिति**। निपातानां [१]द्योतकत्वं चेत्यर्थः। उपसर्गातिरिक्तनिपातानां द्योतकत्ववाचकत्वोभयस्वीकारस्याग्रेयं विभक्तीति सूत्रे भाष्ये स्पष्टत्वात्। उपसर्गाणां तु द्योतकत्वमेवेति स्पष्टं गतिर्गतावित्यत्र भाष्ये इति

१ द्योतकत्वमपीत्यर्थः॥ ख॥

तत्रैव निरूपयिष्यामः। अत एव साचाक्रियते गुरुरित्यादि संगच्छते। प्रारम्भक्रियाविषयत्वद्योतकस्याप्यधश्शब्दस्यान्यार्थं नीयमानदध्यादिवन्मङ्गल्यत्वमपीत्युभयार्थमथशब्दः[१] प्रयुज्यते इति फलितम्। परेत्वत्र वाचकत्वमेवेच्छन्ति। अधिकृतमिति च तदर्थं वदन्ति॥ भाष्ये **प्रयुज्यते** इत्यनेन वर्त्तमाननिर्देशेन सर्वलोकसिद्धमस्याधिकारार्थत्वं न तु वृद्ध्यादिवत्पारिभाषिकमिति ध्वनितम्॥ ननु विवरणेऽधिकृतमित्यधिकं वाचकपदाभावाद् द्योतकत्वानुपपत्तिश्चेत्यत आह **अनेकेति**। उच्यते श्रूयते क्रियत इति **प्रतीयत इति** एतावतैव द्योतकत्वमिति भावः॥ [२]ननु भावसाधनानुशासनपदस्य शास्त्रपदेन सामानाधिकरण्यमनुपपन्नमत आह **व्याकरणस्य चेति**। अन्वर्थत्वात्प्रयोजनाभिधानोपपत्तिः। अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य[३]बोध्यन्तेऽनेनेति करणल्युडन्ततया शास्त्रपदेन सामानाधिकरण्यमिति भावः॥ इदमेव ध्वनयितुम् भाष्ये नामपदोपादानं नामनामिनोरभेदान्नामशास्त्रमिति सामानाधिकरण्यम्। अनेनैवापभ्रंशानामविषयत्वं सूचितं[४]ध्वनीनां च॥ **केषामिति** प्रश्नस्तु किं [५]लौकिकमात्रविषयशाकटायनादिशास्त्रमधिकृतमुत वैदिकमात्र[६]विषयप्रातिशाख्यमितीति[७]परे॥

ननु कर्मणि चेति निषेधात्कथं कर्मषष्ठ्यन्तेन समासोऽत आह

---

१ उभयार्थशब्दः॥ क॥
२ "ननु" इति नास्ति॥ ख॥
३ विविच्य ज्ञाप्यन्ते॥ क॥ ख॥
४ "ध्वनीनां च" इति नास्ति॥ ख॥
५ लौकिकमात्रविषयम्॥ क॥ ख॥
६ विषयम्॥ ख॥
७ "परे" इति नास्ति॥ ख॥

अचचाचार्य्यस्येति। उभयोरुपादान एवोभयप्राप्तिरित्यात्मनाने इति सूत्रे भाष्ये स्पष्टम्॥ कर्त्तृकर्मणोरिति षष्ठ्यामपि समास-निषेधः कुतो नेत्यत आह **इध्मेति**। चस्येत्यर्थकतया कर्म-णीत्युच्चार्यविहितषष्ठ्येव समासनिषेध इति भावः॥ **भाष्ये शास्त्रमित्यस्य** कर्त्तव्यलेनेति शेषः। विवरणकारत्वाद्व्याख्यातव्य-लेनेति शेष उचित इत्यन्ये। शास्त्रत्वं चास्य साधुत्वरूपैकप्रयोजन-सम्बद्धत्वाद्बोध्यम्॥ **सामान्यशब्दत्वादिति**। लोकव्यवहारे ध्वनावपभ्रंशे च शब्दशब्दप्रयोगादिति भावः। एतेन ध्वनिव्यङ्ग्य एव तपरसूत्रादौ [1]शब्दशब्दप्रयोगादिदं चिन्त्यमित्यपास्तम्॥ ननु व्रीहीन्प्रोक्षतीत्यादौ सामान्यशब्दस्याप्यपूर्वार्थेषु विशेषेषु [2]प्रवृत्ति-वत्तद्वाचके साधौ तद्विशेषे प्रवृत्तिर्भविष्यतीत्यत आह **विनेति**। व्रीहिशब्दस्य तु प्रकरणाद्विशेषे प्रवृत्तिरिति भावः॥ **वाग्मिता-दीनाम्** इत्यादिनापभ्रंशसंग्रहः॥ उत्तरपदार्थसंसृष्टपूर्वपदार्थस्य कथं सर्वनाम्ना परामर्शोऽत आह **उत्तरपदार्थान्तर्गतस्येति**। ततः पृथगुपस्थित्यविषयस्येत्यर्थः॥ **बुद्ध्या** मानस्या यद्वा वाक्यजन्यबुद्ध्या॥ **वेदाङ्गत्वादिति** तत्त्वं चागमसिद्धम्। अनेन तन्त्रीशब्दादीनाम-विषयता सूचिता न च वेदाङ्गत्वाद्वैदिका एव विषयास्युः। तत्र तत्र भाषायां छन्दसीत्याद्युक्त्योभयोरपि विषयत्वात्॥ ननु चिदानन्दस्वरूपब्रह्मातिरिक्तस्य सर्वस्य लोकपदार्थत्वाद्वेदस्यापि लोकान्तर्गतत्वाद्वैदेनाभिधानं न युज्यते इत्यत आह **वैदिकाना-मिति**। वैदिकानां लौकिकत्वेऽपौतिपाठः॥ **तेषां त्विति**

---

१ शब्दप्रयोगात्॥ क॥ २ प्रवृत्तिवद्वाचके॥ क॥ ख॥

लौकिकानां याज्ञे कर्मण्येव तत्परिहारस्तेषां तु सर्वत्रेति भावः॥ **भाषाशब्दानामिति।** भाषाप्रयोज्यप्रयोजकवृद्धव्यवहारस्तत्र प्रयुज्यमानानामित्यर्थः। एवं च वेदमात्रान्तर्गतकर्णैर्भिर्देवासो गृभ्णामीत्याद्यतिरिक्तपरता लौकिकशब्दस्य तैस्तद्व्यवहारादर्शनात्[1]। अतएव गौरश्व इत्यादीनां लौकिकोदाहरणत्वसंगतिः। लोके स्वरानादरादेदेतदादराच्च स्वरविशिष्टानां वेदमात्रविषयतामभिप्रेत्य अग्न इत्यादीनां वैदिकोदाहरणत्वसंगतिरिति भावः॥

लोके पदानामुदाहरणत्वोक्तौ वेदे वाक्यानामेव [2]तत्त्वोक्तावाशयमाह **तत्रेति** पदान्तरसमभिव्याहारेण स्वरविशेषाच्च वेदे वाक्यानामुदाहरणत्वोक्तिरित्यपि बोध्यम्। लोकवेदसाधारणतया पाणिनीयशब्दानुशासनस्येवाचार्याधिकृतत्वेन तु शाकटायनादिव्याकरणस्येत्युत्तराशयं परे॥ **भाष्ये लौकिकास्तावदिति।** तावच्छब्दोऽनुक्रमे पूर्वं लौकिका उदाहृियन्ते पश्चाद्वैदिका इत्यर्थः। वैदिकानां प्रधानत्वेऽपि लौकिकानां पूर्वनिर्देशस्तद्ग्रादरसूचनार्थः॥ **अभेदेन लोके इति।** अभेदेनैवेत्यर्थः। शब्दपरत्वाभिप्रायेणास्य[3] गौरिति प्रयोगाभावादिति भावः। पुरोवर्त्तिव्यक्तिं पश्यतो [4]वाचकजिज्ञासया कोऽयमिति प्रश्नेऽयं गौरयं वर्णश्शुक्ल इत्युत्तरस्थले सन्निहितमुद्दिश्य तादात्म्येन शब्दविधेयताप्रतीतिरिति तात्पर्यम्। शब्दार्थयोस्तादात्म्यमेव शक्तिः स्पष्टं चेदं पातञ्जलभाष्ये इति

---

१ तद्व्यवहारदर्शनात्॥ख॥ २ तथोक्तावाशयम्॥क॥
३ "अस्य गौरिति" इति नास्ति॥ख॥ ४ वाचकजिज्ञासायाम्॥क॥

[१]मञ्जूषायामस्माभिर्हरिसंमततया[२] व्युत्पादितम्। [३]अत एव जात्यादिव्यक्त्योरिव रामेतिद्वयचरं नाममानभङ्गः पिनाकिन इत्यादौ शब्दार्थयोरप्यभेदेन व्यवहारः॥ **अथ गौरिति भाष्ये** अथेत्यस्य पृच्छ्यते इति शेषः॥ किं पृच्छ्यते तदाह **गौरित्यत्रेत्यादि॥ कः शब्द इति**। कः शब्दशब्दाभिधेय इति प्रश्नः॥ **प्रतिभासमानेषु**। शब्दजातिव्यक्त्यादिषु॥ नन्वेवं गुणक्रिययोश्शब्दत्वाशङ्कानुपपन्ना नहि ते अपि गौरितिशब्दजन्यबोधे भासेते इति चेन्न। गुणगुणिनोः क्रियाक्रियावतोश्चाभेदात्। शब्दार्थयोश्च तत्त्वात् तदभिन्नाभिन्नस्थेति न्यायेन तच्छङ्कोपपत्तेः। यथा परमकारणाभिन्नकार्य्यकारणकस्य परमकारणेनाप्यभेदः। यद्वा गुणसमूहो द्रव्यमिति पक्षे तस्य भाव इति [४]सूत्रस्थभाष्यसम्मते समूहस्य गोशब्दवाच्यत्वेऽवयवभूतगुणादीनामपि तद्वाच्यत्वमिति शङ्का बोध्या॥ **अत्र गौरिति विज्ञान इति** सामान्योक्त्या तदाकारप्रत्यक्षादिज्ञानेऽपि गुणादीनां सामान्यरूपेण भानमत एव प्रत्यक्षदृष्टेऽपि आम्रफलादौ रसविशेषादिजिज्ञासा। विशेषजिज्ञासायास्सामान्यज्ञानपूर्वकत्वादित्यन्ये। निरूपितं चैतन्मञ्जूषायाम्॥ **यत्तदिति** समुदायो यद्वृत्तार्थं वर्त्तते। तस्यैव पुनस्तद्वृत्तेन स [५]इत्येतेन परामर्शः। यद्वा प्रसिद्धौ॥ ननु यदित्यस्य नपुंसकत्वेन तच्छब्देऽपि नपुंसकलिङ्गमेवोचितमत आह **उद्दिश्यमानेति**। सिद्धवत्कीर्त्तनमुद्देशः। प्रतिपाद्यतया विधेयतया वा कीर्त्तनं प्रतिनिर्देशः।

---

१ मञ्जूषायां निरूपितम्॥ ख॥ २ हर्य्यादिसंमततया॥ क॥
३ "अत एव जात्यादिव्यक्त्योरिव" इति नास्ति॥ ख॥ ४ इत्यनेन॥ क॥ख॥

यथा "ग्रैव्यं हियत्सा प्रकृतिर्जलस्य" इत्यादौ स्त्रीलिङ्गनिर्देशः ॥ **तल्लिङ्गमिति** तयोर्लिङ्गमित्यर्थः ॥

भाष्योक्तहेतुमुपपादयति **भिन्नेन्द्रियेति**। सामान्यव्यतिरिक्तत्वे सति श्रोत्रेन्द्रियग्राह्यत्वं हि शब्दलक्षणमिति भावः ॥ [1]**यदि च द्रव्येति** यदि द्रव्यं शब्दशब्दाभिधेयं स्यादित्यर्थः। तथाहि सति द्रव्यादीनां तन्त्रान्तरे निरूपितत्वात्तस्य वैयर्थ्यापत्तिरित्यपि बोध्यम्। तत्र द्रव्यस्य क्रियाद्याश्रयत्वात्पूर्वमुक्तिः। क्रियागुणौ जात्याश्रयाविति तयोस्ततः पूर्वमुक्तिः। वैशेषिकसिद्धगुणानामपि [2]संयोगविभागादीनामपि[2] क्रियात्वं ध्वनयितुं गुणात्प्राक् क्रियोक्तिरिति ध्येयम्। यत्तर्हि गुरुक्त इत्यादौ गुणस्य शब्दत्वशङ्कापरे वाक्ये इति शब्देन प्रकारार्थेन सुरभ्यादिभेदभिन्नगन्धादिलिङ्गसंख्यादिरूपगुणसंग्रह इति न न्यूनता। ननु शब्दस्यापि गुणत्वाद्गुणो नाम स इत्युत्तरमसंगतम्। तस्य द्रव्यत्वे द्रव्यं नाम तदित्युत्तरासंगतिरिति चेन्न। उक्तद्रव्याश्रितो गुणो नाम स इत्यर्थात्। श्रोत्रग्राह्यत्वादेव क्रियादीनां शब्दत्वे निरस्ते किमुत्तरग्रन्थेनेत्यत आह **अनेनैवेति** ॥ [4]**गोशब्दार्थैषां सम्भवादिति**। अभेदसम्भवात्तेन तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायेन शब्दत्वाशङ्का तेषामिति भावः। यद्वा गोशब्दार्थे गुणसमूहे समूहितयैषां सम्भवादित्यर्थः। [5]शरीरव्यापारो रोमाञ्चादिः ॥ **एकत्वमिति**। अनेकसमवेतत्वस्या-

---

१ एतत् प्रतीकादेव नागेशभट्टीयकैयटपुस्तके "च" शब्दघटितः पाठ आसीदित्यनुमितं भवति ॥ २ संख्यासंयोग ॥ क ॥ ख ॥

३ अयम् "अपि" शब्दः पुस्तकत्रयेऽप्यस्ति ॥ ४ "गो" इति नास्ति ॥ ख ॥ ५ शारीरव्यापारः ॥ क ॥ ख ॥

प्युपलक्षणम् ॥ नित्यत्वेन संयोगनिरासः। एकत्वेन प्रत्यभिज्ञा प्रत्यक्षरूपं प्रमाणं दर्शितम् ॥ भूतशब्दप्रयोगानुपपत्तिं परिहरति **सत्ताख्यमिति**। एवं हि वृक्षवदाम्र [1]इत्यापत्तेः। सामान्यश्रुतेस्सर्वसामान्यविषयत्वेन प्रवृत्तायास्सङ्कोचे कारणाभावाच्च उपमाकथनस्य प्रकृतेऽनुपयोगाच्चाध्याहारे गौरवाच्च नेदं युक्तं किन्तु स्वरूपवाची सः वृद्धिसंज्ञासूत्रस्थभाष्यप्रयोगस्य प्रमाणभूतस्य स्वयं करिष्यमाणव्याख्यानरीत्यास्यापि व्याख्यानसम्भवात्। पिण्डभूत इत्यत्राप्यन्यत्रान्यशब्दप्रयोगः [2]सादृश्येन इति सादृश्यप्रतीतिर्नत्वस्य सादृश्यवाचकत्वे मानमस्तीति दिक्।

भाष्ये आकृतिर्जातिस्संस्थानं [3]ब्रवीति[4]। आक्रियते व्यवच्छिद्यते स्वाश्रयोऽनयेति व्युत्पत्तेरिति भावः। शङ्कापरभाष्ये सामान्यभूतमित्यस्य तद्व्यञ्जकत्वेत्यर्थो[5] बोध्यः। जातिमात्रपरत्वे "जात्याकृतिव्यक्तयः पदार्थः" इति गौतमसूत्रेण तस्यापि पदार्थत्वबोधनात् प्रत्यक्षादौ तद्भानाच्च तस्य शब्दत्वाशङ्का तत्समाधानाभावे न्यूनता स्यात्। सिद्धे शब्दार्थेति वार्त्तिकव्याख्याने भाष्ये तस्यापि पदार्थत्वं कैयटो वक्ष्यति। तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायस्तु यत्र स्वाभिन्नद्वारकस्स्वरूपानुगमस्तद्विषयः। यथा परम-

---

१ इत्याद्यापत्तेः ॥ क ॥ ख ॥ २ सादृश्यपर इति ॥ क ॥

३ संस्थानं च। ब्रवीतीति नास्ति ॥ क ॥ ख पुस्तके संस्थानं ब्रवीति इति नास्ति ॥ ४ अयं पाठः "वालेरण्टाइन" मुद्रापितभाष्यपुस्तकेऽस्ति। वस्तुतो "ब्रवीति" इत्यनुचितमेव ॥

५ तद्व्यञ्जकं चेत्यर्थः ॥ क ॥

कारणकार्योपादानके परमकारणादेः। अत एव सुखदुःखयोर्नैक्यं नापि कुण्डलकटकयोस्तत्कुण्डलारम्भकसुवर्णावयवानुगमस्य कटकेऽभावात्। एवं गुणसमूहस्यानुद्भूतावयवभेदस्य वाच्यत्वेऽपि समूहिनां तत्तद्रूपेणावाच्यत्वान्न तेषां शब्दत्वाशङ्केति भावः॥ **पृच्छतीति**। प्रश्नविषयविशेषान्तराभावात्सामान्यरूपेण पृच्छतीत्यर्थः॥ **भाष्ये उच्चारितेनेति**। शारीरमारुताभिहतकण्ठादिस्थानैरवयवद्वाराभिव्यक्तेन येनेत्यर्थः। अत्र [1]विषाणान्तैरवयवैर्गुणादयोऽप्युपलक्ष्यन्ते॥ **संप्रत्ययो** ज्ञानम्॥ ननु प्रत्यायकशब्दस्य वर्णसमूहरूपतया येनेत्येकवचनमयुक्तम्[2]। न च वनमितिवत्समूहाभिप्रायं तत् [3]समूहस्यास्थिरस्य निरूपयितुमशक्यत्वादत आह **वैयाकरणा इति**॥ वर्णव्यतिरिक्तपदानभ्युपगमे एकैकस्य वर्णस्य वाचकत्वं समुदायस्य वा नाद्य इत्याह **वर्णानां प्रत्येकमिति**॥ द्वितीयमनूद्य दूषयति **आनर्थक्ये तु प्रत्येकमिति**। प्रत्येकमानर्थक्ये तु समुदायस्य वाचकत्वमुपेयं तत्तु न युक्तमिति शेषः॥ यतस्तत्र नयद्वयम्[4] उत्पद्यमानसमुदायस्याभिव्यज्यमानसमुदायस्य वा वाचकत्वमिति तत्राद्यं दूषयति **उत्पत्तिपक्ष इति**। उत्पत्त्यभावादित्यस्य समुदायाभावादित्यनेनान्वयः॥ द्वितीयं दूषयति **अभिव्यक्तीति**। उत्पन्नाभिव्यक्तेर्ध्वस्तत्वादित्यर्थः॥ ननु पक्षद्वयेऽपि पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतान्त्यवर्णानुभवहेतुकैकस्मृत्युपारूढानां [5]वाचकत्वमस्वत आह **एकस्मृतीति**। ननु तस्य नित्यत्वे सर्वदार्थप्रतीति-

---

१ विशेषाणाम्॥ क॥ विषयान्तरैः॥ ख॥　२ एकवचनमप्युक्तम्॥ क॥
३ समूहस्य स्थिरस्य॥ क॥　४ तत्र पक्षद्वयम्॥ क॥ तत्र नद्वयम्॥ ख॥
५ सहकृतां सर्ववर्णानुभवहेतुक–॥ क॥　६ वाचकत्वमत आह॥ क॥

प्रसङ्गोऽत आह **नादेति**। नादो वर्णः॥ ननु येन क्रमेणानुभूता वर्णास्तेनैव क्रमेणैकस्मात्पारूढानां वाचकत्वेन नार्थप्रतीत्यविशेषप्रसङ्गोऽन्यथा त्वयापि वर्णानां स्फोटव्यञ्जकत्वाभ्युपगमात् कथं पूर्वोक्तादोषान्निस्तारस्तवापीत्यत आह **विस्तरेणेति**। इदमेकं पदमेकं वाक्यमिति प्रत्ययः स्फोटसत्त्वे तदेकत्वे च प्रमाणम् अनुभवक्रमेणैव स्मरणमित्यर्थे दृढप्रमाणाभावाच्च क्रमेणानुभूतानां व्युत्क्रमेणापि स्मरणदर्शनात्। मम तु यथा पटे नानारङ्गकद्रव्याहितनानावर्णोपरागः क्रमेण तथैकस्मिन्नेव तस्मिन्नुच्चारणक्रमेण क्रमवानेव तत्तद्वर्णस्वरूपानुरागस्य च स्थिरस्यैव च मनसाग्रहणमिति न दोषः। तत्र येनेत्येकवचनेन विषाणिनामिति बहुवचनेन चानेकोच्चारणविषयगौरित्यस्यैकत्वं सूचितम्। एवं च तेनैव दृष्टान्तेन घटपटादिबोधकसाधारण्येन वाचकस्यैकत्वं सूचितम्। भेदप्रत्ययस्त्वौपाधिक इत्याद्यस्माकमत्र मञ्जूषायां शक्तिवादे द्रष्टव्यम्॥ नन्वेवं तस्य ताल्वोष्ठपुटव्यापारविषयत्वाभावादुच्चारितेनेत्ययुक्तमत आह **प्रकाशितेनेति**। अभिव्यञ्जकैरिति शेषः॥ **भाष्येऽथवाप्रतीतपदार्थक इति**। लोके [१]व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णरूपध्वनिसमूह एव शब्द इत्यर्थः। तस्यार्थबोधकताप्यविचारितरमणीयस्यैव लोके सिद्धा तादृशस्यैव शास्त्रेणान्वाख्यानमिति तात्पर्यम्। तदाह **अन्यचेति**। संग्रहादौ तपरसूत्रे भाष्येचेत्यर्थः। ध्वनिपदेनात्र वैखरी। स्फोटपदेनाभिव्यक्तकत्वादिको[२] मध्यमावस्थ आन्तरशब्द उच्यते। **कथमस्येति**॥

---

१ व्यवहर्तृपदार्थबोधकत्वेन॥ ख॥ २ अभिव्यक्तत्वादिकः॥ क॥

कुर्वन्नित्यस्य वर्त्तमानार्थकत्वादित्यर्थः॥ **भाष्येकानि पुनश्शब्दानुशासनस्येति**। शब्दज्ञानफलकव्याकरणाध्ययनस्येत्यर्थः। तदाह **किं सन्ध्येति**। शब्दज्ञानद्वाराध्ययनस्य तदज्ञानप्राप्तप्रत्यवायपरिहारः फलम् उत तदतिरिक्तमपि किंचिदिति प्रश्नाशय इत्यर्थः। प्रयोजनशब्दः करणव्युत्पत्त्या प्रयोजकपरोऽपि तेन व्याकरणाध्ययनस्य प्रयोजकं किंचिदस्ति नवेत्यपि प्रश्नाशयो बोध्यः। अत एवोत्तरे आगमपदोपादानम्। नपुंसकमनपुंसकेनेत्येकशेषः। तचैकवद्भावस्य वैकल्पिकत्वात्प्रश्ने बहुवचनमुत्तरे एकवचनं बोध्यम्॥ पुरुषार्थोधर्मोमोक्षश्च॥ ननु शिष्याचार्यसम्बन्ध एव महान्वेदरक्षाहेतुः किं व्याकरणेनेत्यत आह **लोक इति॥ भाम्येदिति**। भ्रमेण पाठान्तरं कल्पयेदित्यर्थः। [1]नवाचार्यवचनाद्भ्रमनिवृत्तिः भ्रंशशङ्कया तेष्वविश्वासात्॥ वेदार्थावगमद्वारापि व्याकरणं पुरुषार्थसाधनमित्याह **वेदार्थचेति**। एवं च वेदार्थज्ञानपूर्वकं शुद्धतत्तन्मन्त्रैस्तदिहितकर्मानुष्ठानेन स्वर्गसुख मुपनिषदर्थज्ञानेन वक्ष्यमाणरीत्या वा मोक्षश्च पुरुषार्थो व्याकरणाध्ययनस्य फलमिति भावः॥ **विकार इति**। लोपस्तु न विकार इति पृथगणितः। भावरूप एवचादेशोऽच विकारः॥ **हृग्रहोर्भ इति**। दृदृक्ष ग्रभ्णामीत्यादयर्थमावश्यकम्। एतेनोद्ग्राभनिग्राभौ चेत्यनेन[2] भस्यापि सिद्धत्वादेतदप्यसङ्गिन्य इति परास्तम्। अन्यार्थमावश्यकेन तेनैव भस्य सिद्धौ तदंशे निपातनाश्रयणवैयर्थ्यात्॥ निपूर्वाद्ग्रहेर्घञ्विधायकाभावादाह **उद्ग्राभनिग्राभौचेति॥ भाष्ये खल्वपीति** नि-

---

१ नचाचार्यवचनात्॥क॥ २ इत्यनेनैव॥ख॥

पातसमुदायो निश्चयार्थः। ऊहः खल्वपीत्यस्य प्रयोजनमिति शेषः॥ ननु यत्र प्रकरणे ये मन्त्राः पठितास्तत्र तेषां तथैव प्रयोग दृष्ट इति नोहेन प्रयोजनमित्याशङ्क्य प्रकृतावूहाभावेऽपि विकृतावूह इति दर्शयितुमप्रकृतिशब्दार्थमाह **इहेति**। यस्मिन्नाग्नेयादौ यागान्तरेण सौर्यादिना। प्रकृतिविकृत्यवगमश्च द्विदेवत्यत्वैकदेवत्यत्वादिसाम्येन बोध्यः॥ अन्यत्र पठितमन्त्राणाङ्क्थमन्यत्रगमनमत आह **प्रकृतिवदिति**। यथा सोपकारा प्रकृतिरनुष्ठीयते तथा विकृतिरपीतितदर्थः। तदनेनोपकारानिदेशे तत्पृष्ठभावेन पदार्था अपतिदिश्यन्ते इतिकर्त्तव्यतायामभावनायास्माकाङ्क्षत्वादेतन्मूलकमेव प्रकृतिवदितीति मीमांसकसरणिः॥ पदार्थान्तर्गताश्च मन्त्राः तत्र अग्निसम्बन्धिनिर्वापप्रकाशकमन्त्रस्याग्निपदस्य सूर्यसम्बन्धिनिर्वापप्रकाशनासमर्थत्वात्तदपहाय तत्स्थाने सूर्यायेत्यूह्यमित्याह **तत्राग्नेरिति॥ मन्त्र ऊह्यत इति**। यद्यप्यूहे न मन्त्रलक्षणयाप्येकदेशस्योहेऽपि अनेकपदसमुदाये मन्त्रलप्रत्यभिज्ञानात्तद्घटिते समुदाये मन्त्रत्वव्यवहारः कर्मणस्साङ्गत्वेति बोध्यम्। सोऽयमप्रकृत्यूहः [1]अन्येऽप्यूह्याः ऊहज्ञस्य हि आर्त्विज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसुखसिद्धिः फलमिति बोध्यम्॥ **भाष्ये लिङ्गपदञ्च** प्रकृत्यादेरुपलक्षणम्॥ [2]**यथायथमिति**। [3]अर्थप्रकाशनसामर्थ्यानतिलङ्घनेनेत्यर्थः॥ ननु वक्ष्यमाणागमस्य न व्याकरणफलत्वमत आह **प्रवर्त्तक इति॥ नित्यकर्मतामिति**। एतेन नित्यकाम्यता व्याकरणाध्ययनस्येत्युक्तम्। नित्यत्वञ्चाध्येयज्ञेयपदार्थविशेषणीभूताध-

---

१ एवम्॥ ख॥ २ यथार्थमिति॥ ख॥ ३ अर्थप्रकाशनम्॥ ख॥

यनज्ञानयोर्बोध्यम् । अत्र ब्राह्मणेनेत्युक्तेरन्यस्यैवमध्ययनं काम्यमेवेति सूचयतीति कश्चित् ॥ **निष्कारण इति ।** कारणशब्दः फलपरः ॥ ननु नित्यत्वेऽपि प्रत्यवायपरिहाररूपमफलमस्त्येवेत्यत आह **इष्टमिति ॥** अध्ययनादिनिष्ठकारणानपेक्षत्वं विषय आरोप्य निष्कारणो वेद इति प्रयोगः ॥ आगमपदेन श्रुतिः श्रुतावपि जनमेजयाद्युपाख्यानवत्पौरुषेयव्याकरणस्यापि नित्यताबोधनमुपपद्यते । यद्वा तेन प्रोक्तमिति सूत्रोक्तभाष्यरीत्या वेदार्थवद्व्याकरणार्थोऽपि अनादित्वरूपनित्यतावानिति श्रुत्या तस्य नित्यत्वबोधनमिति बोध्यम् । धर्मत्वञ्च वेदस्य पुरुषयत्नसाध्यतया धर्मत्वेनाभिमताध्ययनज्ञानकर्मत्वेनौपचारिकमित्याशयः ॥ षडङ्गः शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्यौतिषाङ्गसहितो वेदः स्वशाखारूपः । अध्येय इत्यतः प्रेरणाविषयाध्ययनकर्मेति बोधः । यद्यपि तेन प्रोक्तमिति सूत्रे भाष्ये वक्ष्यमाणरीत्या वेदत्वं शब्दतदर्थोभयनिष्ठं तथापि ज्ञेय इत्यस्य सम्यगर्थबोधपर्य्यवसाय्यध्ययनकार्यमित्यर्थे तात्पर्यम् अत एव समानमीहमानानामधीयानानाञ्च केचिदर्थैर्युज्यन्ते केचिन्नेति वक्ष्यति भाष्यकृत् । अध्ययनतथाज्ञानयोश्च समुच्चयः । अनेनातादृशस्याधर्मत्वं सूचयति श्रुत्या मिलितस्यैव धर्मत्वबोधनात् । तथा च व्यासः । "वेदार्थज्ञो जपं जप्त्वा तथैवाध्ययनं द्विजः । कुर्वन् स्वर्गमवाप्नोति नरकन्तु विपर्यय" इति । जपपदं मन्त्रसाध्यकर्ममात्रोपलक्षणम् । ज्ञाधातोश्च ज्ञानानुकूलो मनः प्रणिधानविषयेन्द्रियसंयोगसम्पादनादिरूपो व्यापारोऽर्थस्तस्यैवाच्र विधेयत्वम् एतेन ज्ञानस्याविधेयत्वादिदञ्चिन्त्यमित्यपास्तम् ॥ ननु गुणानाम्परस्परसम्बन्धाभा-

वात् षडङ्गेषु प्रधानमित्यनुपपन्नमत आह **पदेति**। एवञ्च वेदार्थज्ञाने व्याकरणमप्रधानङ्कारणमिति भावः॥ **भाष्ये प्रधाने कृतो यत्न इति**। प्रधानविषये निर्वृत्त इत्यर्थः। अन्यथा यत्नविषयकृतेरसम्भवादसङ्गतिः स्पष्टैव॥ [१]भाष्ये च फलवानित्यत्र फलपदेन वाक्यार्थावगमो विविक्षितः। एतच्छास्त्रञ्च पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगीति बोध्यम्। एवञ्च व्याकरणानध्ययनप्रयुक्तस्य वेदार्थाज्ञानप्रयुक्तस्य च [२]प्रत्यवायस्य परिहारकतयास्य नित्यत्वमिति बोध्यम्॥ अवश्यमित्यनेन विवक्षितं दर्शयति **अध्यापनमिति**। लाघवञ्च प्रतिपदपाठापेक्षया प्रकृत्यादिविभागेनान्वाख्यानस्य विवक्षितम्॥ नन्वसन्देहस्सन्देहाभावः स च नात्यन्ताभावस्तस्य नित्यत्वात्। न च ध्वंसः तत्तद्विषयकव्याकरणज्ञानवतस्सन्देहस्यैवाभावेन तदसम्भवात्। यस्य त्वधीतव्याकरणस्यापि क्वचित्सन्देहः स तद्विषयकवैयाकरणत्वाभाववानेव। वेदनार्थं हि तत्र प्रत्ययोऽत आह **प्रागभाव इति**। तत्परिपालनञ्च शास्त्राध्ययनफलं न तु स्वरूपं तस्याजन्यत्वात् तत्पालनञ्च प्रतियोगिजनककारणविध्वंसनं प्रागभावस्य प्रतियोगिजन्म[३]नाश्यत्वादिति बोध्यम्॥ **भाष्ये याज्ञिकाः पठन्तीति**। यज्ञकाण्डभवा वैदिकाः शब्दा याज्ञिकास्ते पठन्तीत्यर्थः। ऋषिः पठति शृणोत गावाण इतिवत्प्रयोगः। तच्च ऋषिर्वेदः। सन्सूत्रे भाष्ये एष प्रयोगः॥ **ताम् अनड्वाहीम्**॥ कस्तर्हि निश्चयस्तत्राह [४]**पूर्वपदस्येति**॥ नन्वस्ते-

---

१ भाष्ये च इति तु नास्ति॥ क॥ ख॥ २ "प्रयुक्तस्य च प्रत्यवायस्य" इति नास्ति॥ ख॥ ३ जन्यनाश्यत्वात्॥ क॥ ४ पूर्वपदेति॥ ख॥

च्छत्वादीनाम् बज्झत्वाद्ग्रहणमनुग्रहो न्याय्य इति प्रथमतोऽभिधानमुक्तमत आह **मुख्यानीति**। प्रधानत्वादेव तेषां प्रथमतोऽभिधानमिति भावः। तेषां प्रधानत्वञ्च पदपदार्थज्ञानाधीनत्वेनान्तरङ्गत्वात्। वक्ष्यमाणानाञ्च बहिरङ्गशब्दाप्रशब्दप्रयोगविधिनिषेधविषयत्वादानुषङ्गिकत्वमबोध्यम्॥ ननु भूय इत्येकवचनमनुपपन्नं प्रयोजनानीत्यनेन सामानाधिकरण्यादत आह **पुनरिति॥ इमानि चेति।** चस्समुच्चये॥ **भाष्ये प्रयोजनानीति।** प्रवर्त्तकानि फलानि चेत्यर्थः। तत्र वक्ष्यमाणवाक्यानि प्रवर्त्तकानि तद्बोध्यानि फलानीति विवेकः॥ ननु रत्नादिभिः [1]सहैवैतानि कुतो न पठितानीत्यत आह **आनुषङ्गिकत्वादिति**। एषामानुषङ्गिकत्वं तेषां प्रधानत्वबोधयितुमन्यथोक्तिरिति भावः॥ ननु पराबभूवुस्तस्माद्ब्राह्मणेनेति श्रुतौ पराभवस्यापशब्दभाषणफलत्वावगतेः पराभूता माभूमेत्यध्येयमिति वक्तुमुचितमत आह **निन्दार्थवादेनेति**। द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादितिन्यायेन यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यादावपापश्लोकश्रवणस्य प्राशस्त्यमात्र परत्वबदस्य निन्दामात्रपरत्वादिति भावः। प्रकरणाच्च [2]क्रत्वर्थोऽयन्निषेधः॥ **केचिदाहुरिति**। अत्रारुचिबीजन्तु सर्वः श्रुतस्याहसमनिच्छता विभाषा कर्त्तव्य इति॥ **पदेति**। सर्वस्य द्वे इत्यत्र पदग्रहणस्य वार्त्तिकक्षतोक्तत्वादिति भावः॥ ननु

---

१ सहैतानि॥ ख॥ २ भाषणफलावगतेः॥ ख॥

३ यद्यप्युपलब्ध पुस्तकेषु "क्रत्वङ्गोऽयमि"त्यस्ति तथाप्यङ्गशब्दस्य नित्यनपुंसकत्वाद् बज्झत्रीहावर्थासङ्गतेश्च "क्रत्वर्थोऽयमि"ति पाठः स्थापितः॥

नेदं द्वित्वं किन्त्वैच्छिकः पुनः प्रयोगोऽत आह **लत्वञ्चेति**। **न म्लेच्छितवै** इत्येतन्म्लेच्छभाषा[1]विषयमिति भ्रमनिवृत्त्यर्थं तद्विवरणञ्चापभाषितवै इति॥ **हवै इति** प्रसिद्धौ। अपशब्दत्वं व्याकरणानुगतशब्दस्येषद्भ्रंशन एव प्रसिद्धमिति भावः। ननु म्लेच्छो नाम पुरुषविशेषो देशविशेषो वा स कथमपशब्दोऽत आह **घञ्निति**। निन्दावचनाद् म्लेच्छतेरिति भावः। निन्दा च शास्त्रबोधितविपरीतोच्चारणेन पापसाधनत्वात्। एवञ्च म्लेच्छा इत्यस्य निन्द्या इत्यर्थ इति दिक्॥ असर्वनामत्वात्तसोऽप्राप्तेराह **स्वरेणेति आद्यादित्वादिति च**॥ तमित्यस्य यच्छब्दापेक्षितत्वादाह **यदर्थेति**। मिथ्याप्रयुक्त इत्यस्य विवरणन्ततोऽर्थान्तरमिति। [2]न केवलन्तदर्थमेव नाहेत्येतावत् किन्तु प्रत्यवायोत्पादनद्वारा हिंसकोऽपीत्याह **वागेवेति**। यथाध्वर्युकृताद्धोमाद्यजमाने धर्मोत्पत्तिरेवन्तत्कृतापशब्दप्रयोगात्तस्मिन् प्रत्यवाय इत्याशयः। तत्र दृष्टान्तमाह **यथेति वृत्रेणेति**। हेतौ तृतीया फलमपीह हेतुः॥ **मन्त्र इति**। न चोहितस्य कथं मन्त्रत्वमिति वाच्यम् मन्त्रशब्दस्य बोधकपरत्वात्। अत एव मन्त्रोहीनः स्वरत इति प्रसिद्धमपि शिक्षापाठं विहाय भाष्ये दुष्टशब्द इति पठितं तत्त्यमन्त्रशब्दस्य शब्दमात्रपरतेति सूचयितुम्॥ शत्रुशब्दस्यामित्रपर्य्यायत्वे बहुव्रीहितत्पुरुषयोरविशेषोऽत आह **तत्रेन्द्रस्येति**। शत्रेर्णन्तादौणादिकः क्रुन् प्रज्ञादिगणे निपातनाद्वस्वत्वम्। शमेस्तु तत्वम्॥

---

१ म्लेच्छभाषणविषयम्॥ ख॥ २ न केवलं तमर्थं नाहेति॥ क॥ ख॥

[१]सम्बोधनविभक्त्यभावायाह [२]इन्द्रशुचुत्वस्येति। नन्वत्र यज्ञकर्मणीत्येकश्रुतौ प्राप्तायाम्पूर्वपदप्रकृतिस्वरकरणं स्वरापराध इति वक्तुं युक्तम्। न च तथैवास्तु व्रतपथब्राह्मणतद्भाष्यविरोधात् तत्रह्याद्युदात्तत्वकरणमेव स्वरापराध उक्त इत्यादि स्पष्टमस्मत्कृतैकश्रुत्यवादेऽत आह **उह्यमानस्य चेति**। तदुक्तमनाम्नातेष्वमन्त्रत्वमिति न चास्यामन्त्रत्वे लौकिकशब्देन क्रियमाणस्य कर्मणः कथमफलजनकत्वमिति वाच्यम्। सूर्यायत्वेत्यादेर्लौकिकघटितस्य उहविधायकशास्त्रबलेन फलजनकत्ववदुपपत्तेरित्याहुः॥ नन्वधीतमविज्ञातमिति विरुद्धमत आह **अविदितेति**। शुष्केध इति सान्तक्लीवैधशब्देनादन्तपुल्लिङ्गेन वा निर्वाह्यम्। निरुक्ते तु यद्गृहीतमविज्ञातमिति पठ्यते तत्र गृहीतं शब्दतः अविज्ञातमर्थत इति बोध्यम्॥ **भाष्ये तस्मादनर्थकमिति**। अनेन निन्दार्थवादेन निष्प्रयोजनाध्ययनानौचित्येन निष्प्रयोजनत्वाध्येयमिति निषेधकल्पनादिति भावः। अतो [३]निषिद्धमध्ययनं माभूदिति व्याकरणमध्येयमिति तात्पर्यम्॥ एकः पूर्वपरयोरित्यत्र भाष्ये पठितैकशब्द इत्यादिश्रुतिमूलकमाह **भाष्ये यस्त्विति**। अभ्युदयहेतुत्वम् अदृष्टद्वारा पुरुषार्थसाधनत्वम्॥ कुशलोऽधीतव्याकरणः। लक्षणस्मरणपूर्वकं यः प्रयुङ्क्ते इति फलति॥ **विशेष इति**। अर्थविशेष इत्यर्थः। तदाह **स एवेति**। साधर्म्यात्। साधर्म्यमूलकादभेदारोपात्॥ **भाष्ये यथावत्**। असम्बुद्धतादिदोषरहितम्।

---

१ सम्बोधनविभक्त्यभावमाह ॥ क ॥ २ शुचुत्वस्येति ॥ ख ॥
३ निषिद्धा ॥ क ॥ निषिद्धमाभूदिति व्याकरणम् ॥ ख ॥

वाचो योगः प्रकृतिप्रत्ययविभागेनार्थविशेषपरत्वन्तद्वेत्तीति वाग्योगविद् ॥ **श्रुतत्वादिति** । एकत्र जयाग्निदोषयोश्चकारेण समुच्चयप्रतिपादनाच्चेत्यपि बोध्यम् ॥ **दोषदर्शनादिति** । शास्त्रस्याधर्महेतुत्वं दोष इत्यर्थः ॥ वादिप्रतिवादिपूर्वपक्षोत्तरपरतया व्याख्यानेऽसामञ्जस्यमत्वाह **प्रष्टैवेति** ॥ **भाष्ये कुत एतदिति** । वाग्योगविदो दोषः कुत इत्यर्थः ॥ ननु साधुज्ञानस्य [1]धर्मजनकता यथा शास्त्रोक्ता न तथाऽसाधुज्ञानस्याधर्मजनकता शास्त्रोक्तेत्यत आह **यथेति** । एवञ्चापशब्दज्ञानमधर्मसाधनमधर्महेतुशब्दज्ञानविरोधित्वात् । यद्यद्विरोधि तत्तद्विरोधिफलकं यथा श्लैष्मिकद्रव्यसेवेत्यनुमानप्रमाणमिति भावः । एवञ्च शास्त्रस्याधर्महेतुतया तत्र प्रवृत्तिर्न स्यादिति नेदं वचो व्याकरणाध्ययनानुष्ठापकं स्यादिति तात्पर्यम् ॥ नन्वस्त्वधर्मोऽपि तथापि धर्माधिक्याय्याध्येयं व्याकरणमत आह **भाष्येऽथवेति** ॥ **अङ्गभूयस्त्वादिति** । अङ्गानामधर्मजनकानाम्भूयस्त्वादित्यर्थः । एवञ्च यज्ञादेः पापजनकत्वेऽप्यधिकधर्मजनकत्वाद्यथा तत्र प्रवृत्तिस्तथा प्रकृतेऽपीति भावः ॥ **अल्पीयांसः शब्दा इति** । एवञ्च श्वदृतिप्रच्छिन्नचीरवदनुपादेयन्तद्विज्ञानमिति भावः ॥ नन्वेवं सामर्थ्यादवाग्योगविदेव दुष्यतीत्यत्र कर्त्तास्वत आह **भाष्येऽथयोऽवाग्योगविदिति** ॥ अत्यन्तमित्यर्थः **त्यन्ताये**त्यव्ययम् ॥ **पुरुषाणामिति** । मनुष्याणामित्यर्थः । तिरश्चामत्यन्तायोग्यत्वादस्वज्ञानं शरणं मनुष्याणान्तु योग्यत्वात्तैर्निषिद्धानुष्ठानवर्जनार्थमवश्यं शास्त्रं विज्ञेयमतोऽवा-

---

१ यथा धर्मजनकता ॥ क ॥ ख ॥

ग्योगविदो महाननर्थ इति भावः। तच्च नात्यन्तायेत्यनेन शास्त्राज्ञानन्नैव शरणन्दोषद्वयप्रसङ्गात् किन्तु वध्यादेर्ब्राह्मणत्वाद्यज्ञानमेव पापाल्पत्वे प्रयोजकमिति ध्वनितम्। **भाष्ये यो ह्यजानन्निति।** निषेधशास्त्रमजानन्ब्राह्मणत्वादिज्ञानपूर्वकन्तद्वधादिकुर्य्यात् सोऽपि पतित एवेत्यर्थः॥ **प्रकरणादिति।** सन्निधेरित्यर्थः। नन्वेवं वाग्योगविदोऽपशब्दज्ञानादधर्मस्यादत आह **वाग्योगेति।** एवञ्चापशब्दप्रयोग एवाधर्महेतुर्न ज्ञानमात्रमिति [1]न दोष इति भावः॥ भ्राजा नाम कात्यायनप्रणीताः श्लोका इत्याहुः॥

भाष्ये किञ्चात इति। अतः प्रश्नात्किं विवक्षितमित्यर्थः। **उदुम्बरं** ताम्रम्॥ **दुष्टत्वमिति।** इदमुपलक्षणम् [2]अन्यत्रापि दुष्टत्वस्य॥ ननु कर्त्तरिक्तान्तप्रमत्तशब्दस्य गीतशब्देन समासोऽनुपपन्नः तच्च भवत इत्यनेन साकाङ्क्षत्वादत आह **प्रमादेनेति।** भावे क्तान्त इति भावः। विप्रतिपन्नत्वेन वेदविषयविप्रतिपत्त्याश्रयत्वेन तत्त्वं स्वस्मिन्नारोप्य दैत्यनाशाय पूज्यस्यापि भगवत ईश्वरस्य तथोक्तिरिति स न प्रमाणमिति भावः॥ भाष्ये यस्त्वप्रमादेन गीतो यस्य कस्यापि [3]तत्प्रमाणमितिप्रतिनिर्द्देश्यलिङ्गम्॥ ननु कथञ्ज्ञातमयमप्रमत्तगीत इत्यत आह **श्रुतिरनुग्राहिकेति॥**

भाष्येऽविद्वांस इति। अत्र योग्यत्वाद्व्याकरणङ्कर्म बोध्यम्। प्रत्यभिवादेऽ[4]भिवादानन्तरप्रयोज्याशीर्वादवचने नाम्नोऽभिवादक-

---

१ "न दोष इति" इति नास्ति॥ ख॥　　२ अन्यत्रादुष्टत्वस्य॥ ख॥

३ "तत्प्रमाणमिति प्रतिनिर्द्देश्यलिङ्गम्" इति पुस्तकत्रयेऽप्यस्ति। णदन्त एवतु उचितः। उद्देश्यप्रतिनिर्द्देश्ययोरिति शेखरे दर्शनात्॥

४ अभिवादानन्तरप्रयोज्ये वचने॥ क॥ ख॥

नान्नष्टेः [1]श्रुतिङ्कर्त्तुं ये न जानन्ति तेषु कामन्निश्शङ्कं विप्रोष्य प्रवासादेत्य यद्वा कामं विध्यनुसारमन्तरैवेत्यर्थः ॥ अयमहमित्यनुकरणस्यानितिपरत्वेऽपि क्रत्र्योगाभावाद्गतित्वाभावेन वदेदित्यस्य तिङन्तत्वेन च समासाभाव इत्याहुः ॥

अत्र क्वचिदयमहमिति वदेत् अनुकरणञ्चानितिपरमितिगतित्वात्समास इति पाठो दृश्यते सोऽपपाठः ॥ [2]**भाष्ये स्त्रीवदिति।** तद्वत्करणेन[3] शास्त्राज्ञानिलक्षतापमानप्रयुक्तदुःखभाजोमाभूमेति भावः ॥ ननु प्रकृतौ प्रयाजमन्त्वास्सुविभक्तिका एव पठ्यन्ते तत्किमनेन वचनेनेत्यत आह **प्रयाजेति।** ऊह्यमाना याऽग्निशब्दप्रकृतिकाविभक्तिस्तद्युक्ता इत्यर्थः ॥ नन्वग्निशब्दप्रकृतिकेत्यसङ्गतम् अपूर्वविभक्तिमात्रविधाने न केवलः प्रत्यय इति निषेधात्। यत्किञ्चित्प्रातिपदिकप्रकृतिकास्सुर्वा विभक्तयः प्रयोक्तव्या इति प्राप्नोतीति चेन्न त्वमग्ने प्रयाजानुयाजानाम्पुरस्तात्त्वमस्यादिति मन्त्रवर्णेनाग्निशब्दप्रकृतिका एव ता इत्याशयात् तत्राग्नेर्देवतायाएकत्वादेकवचनमेव विभक्तयश्च प्रथमाद्वितीयातृतीयाषष्ठीसप्तम्य एवेति औतसम्प्रदायः ॥

व्यञ्जनसहित इति। यथा ये यजामह इति पञ्चाचरमिति वर्णशब्दः पूर्वसूत्र इति भाष्यादर्णमात्रमित्यन्ये ॥

सकृत्प्रयुक्तार्त्विजीनशब्दस्योभयपरत्वे युक्तिमाह **विद्वानिति।** वेदार्थज्ञ इत्यर्थः ॥ **चत्वारीति।** चतुरन्तः ॥ **शब्दस्येति।**

---

१ श्रुतं कर्तुम् ॥ ख ॥ २ "भाष्ये" इति नास्ति ॥ ख ॥
३ सूचित इत्यधिकम् ॥ क ॥ ख ॥

शब्दशास्त्रप्रतिपाद्येत्यर्थः। वृषभाकारश्शब्दशास्त्रप्रतिपाद्यः शब्दो रोरवीति महान्देवः अन्तर्यामिरूपः शब्दो मर्त्याँ आविवेश स्वाभेदमाविष्कृतवानिति मन्त्रतात्पर्यम्। महतो देवस्य शब्दब्रह्मणो व्याकरणज्ञाप्यतया व्याकरणज्ञस्तदाविष्ट इव भवतीति यावत्॥ **भाष्ये पदजातानि।** परापश्यन्तीमध्यमावैखरीरूपाणि। अत एवाग्रे निपातास्येतिचकारः सङ्गच्छते॥ **नामाख्यातेति।** नामशब्देन सुबन्तम्। नमत्याख्यातार्थमिति विशेषणीभवतीति व्युत्पत्तेः। आख्यातं तिङन्तम्। उपसर्गनिपातयोः पृथगुपादानङ्गोवलीवर्दन्यायेन॥ **व्यङ्ग्य** आन्तरः॥ **व्यञ्जकः** वैखरीरूपः॥ तिङ्विभक्तीनां षट्त्वादाह **सुप इति॥ सहशेषेणेति।** शेषः षष्ठ्यर्थः तत्सहितकारकाभिधायकत्वेन सुप्तिङोरुभयोरपि सङ्ग्रह इति भावः॥ **भाष्ये उरसीत्यादि।** "हकारव्यञ्जनैर्युक्तमन्तस्थाभिश्च संयुतम् उरस्यन्तं विजानीयात्"। मूर्ध्न्या च्टुरघा इत्युक्तेः। मूर्ध्नैव शिरः कण्ठ इत्यनेन मुखान्तर्गतकण्ठादिस्थानमुपलक्ष्यते॥ ननु वर्षति मूत्रेण भूमिं सिञ्चतीति वृषभ इत्युच्यते तत्कथं शब्द एवमित्यत आह **कामानामिति।** मेघ उदकमिवोक्तचतुःशृङ्गत्वादिगुणवैशिष्ट्येन ज्ञानपूर्वकप्रयोगेण कामानान्दानादित्यर्थः। द्विशृङ्गद्विपाद्द्विकरकण्ठमात्रवद्धलौकिकवृषभादस्य व्यतिरेकः॥ किं रोरवीति तत्राह **भाष्ये महान्देव इत्यादि।** महान्परब्रह्मस्वरूपो देवोऽन्तर्यामिरूपः शब्दो मर्त्येष्वाविष्ट इत्यर्थः। तदावेशफलमाह **महता देवेनेति॥ साम्यं** सायुज्यम्। तदुक्तं हरिणा। **अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।**

प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते ॥ आह च "चत्वारिशृङ्गा त्रयो अस्य पादा" इत्यादि ऋङ्मन्त्रः। इह द्वौ शब्दात्मानौ कार्यौ नित्यश्च तत्रान्त्यस्सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभस्तस्मिन् खलु वाग्योगविद् शास्त्रजशब्दज्ञानपूर्वकम्प्रयोगेण क्षीणपापः पुरुषो विच्छिद्याहङ्कारग्रन्थीनत्यन्तं संसृज्यते इति तदर्थं तद्व्याख्यातारः ॥ **एतावन्त्येवेति**। वाक्परिमितानीति षष्ठीतत्पुरुषः। पदजातानि परापश्यन्तीमध्यमावैखर्य्यः। नामादीनि च नामादिमध्ये च एकैकं चतुष्पादम् ॥ **भाष्ये मनस ईषिणः**। चित्तशुद्धिक्रमेण वशीकर्त्तारो विषयान्तरेभ्यो व्यावृत्याहिंसका वा ते च वैयाकरणा अन्येषां तदज्ञाने हेतुमाह **गुहेति**। एकैकस्य नामादिरूपस्य चतुर्थं भागम् एकैकस्य चतुरंशत्वात् परादीनां वा त्रयोऽंशा मध्यमान्ताः। गुहा अज्ञानं हृदयादिरूपा च वैयाकरणस्तु शास्त्रबलेन तद्बलबध्योगेन च गुहान्धकारं [१]विदार्य सर्वं जानातीति भावः ॥ **न निमिषन्तीति**। ज्ञानसामान्यविषयत्वाभाव उच्यते ॥ **भाष्ये यन्मनुष्येषु वर्तते** [२] **इति**। ज्ञानविषयतया तद्वाचश्चतुर्थमित्यन्वयः। तस्मात्सकलपदज्ञानाय मनीषिणाय वाग्येयं व्याकरणमिति शेषः ॥ हरिरप्याह **वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्। अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्** ॥ तत्र श्रोत्रविषया वैखरी मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहारकारणम् पश्यन्ती तु लोकव्यवहारातीता योगिनां तु तत्रापि प्रकृतिप्रत्ययविभागावगतिरस्ति परायां तु

---

१ विहाय सर्वं जानाति ॥ ख ॥ २ "इति" इति नास्ति ॥ ख ॥

नेति चख्या इत्युक्तम्। "स्वरूपज्योतिरेवान्तः परावागनपायिनी। तस्यां दृष्टस्वरूपायामधिकारो निवर्त्तत" इत्युक्तेः। अनेकतीर्थभेदाया नामाख्यातादिवीणावेणुमृदङ्गशब्दादिरूपानेकभेदायाः। आह खल्वपि "चत्वारि वाक्परिमितानी"ति चङ्क्रम्य इति तद्व्याख्यातारः॥ **उतत्व इति**। उतोशब्दोऽप्यर्थे बह्वनामपि समानपृष्ठोदरपाणिपादाना[1]मध्ययनमधीयानानामेकः कश्चित्पश्यन्नपि स्वध्यस्याध्ययनोऽपि तीक्ष्णबुद्धिरपि सन् न पश्यति अर्थानभिज्ञत्वात्। अर्थपरिज्ञानफला हि वागित्यभिप्रायः। एवमेकः शृण्वन्नपि न शृणोत्येनां वाचं य एवह्यर्थं सम्यगवबुध्यते तेनैव हि सा सम्यक् श्रुता भवति॥ एवमर्द्धनाविद्वांसंनिन्दित्वार्द्धान्तरेण विद्वांसं स्तौति। **उतो त्वस्मै**। अथैकस्मै कस्मैचिद्वैयाकरणाय [2]तन्वं शरीरं [3]विसृणोति प्रकाशयति सम्यग्ज्ञानं हि प्रकाशनमर्थस्य अर्थो हि वाच्यश्शरीरम्। अथोपमायुक्तयोक्तमया वाचान्यपादेन तमेव स्तौति यथा जाया विवृतसर्वाङ्गावयवाभूत्वोशती कामयमाना भर्त्रे प्रेम्णा दर्शयत्यात्मानम्। कस्मिन् काले यदा सुवासा निर्णिक्तवासा नीरजस्का ऋतुकालेषु तदा ह्यतितमां स्त्री पुरुषं प्रार्थयते। यथा तत्पुरुषस्तां यथावत्पश्यति शृणोति च तद्वचनार्थं नान्यदा घनपटप्रावृतशरीराम् एवं स एवैनां वाचं पदशः प्रकृतिप्रत्ययविभागेन विगृह्यार्थमस्याः पश्यति शृणोति चेत्यर्थः। अयमर्थो निरुक्तब्राह्मणयोस्स्पष्टः॥ **भाष्ये वाग्विदे**। वैयाकरणाय॥ **भाष्ये सक्तु-**

---

१ "अध्ययनम्" इति पुस्तकचयेऽप्यस्ति॥ २ तत्त्वम्॥ख॥
३ विसस्रे इत्यधिकम्॥ख॥

मिवेति। यत्र व्याकरणे धीरा ध्यानवन्तः मन्तस्तितउना मक्षु-मिव ध्यानयुक्तमनसा तत्करणकज्ञानेन वाचमक्रतावृषत असाधुभ्यो विविक्तां कृतवन्तः ते तत्करणेन शुद्धचित्ता अत्र ब्रह्मप्रतिपादकशब्दे शब्दार्थयोरभेदबुद्ध्या सखायः समानख्यातयः समानज्ञानाः तच्छब्दे ब्रह्मैकत्वज्ञानवन्तस्तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मनिरूपिताभेदज्ञा-नवन्तः सख्यानि सायुज्यानि जानते प्राप्नुवन्तीत्यर्थः। यत एषां वाचि भद्रालक्ष्मीः स्वप्रकाशब्रह्मरूपा अधि अधिकं निहिता स्थिता भवतीति ऋगर्थः। **सचतेर्दुर्धाव इति।** यतस्सचतेरतो दुः-शोध्यार्थप्रतिपादको भवतीत्यर्थः। तितउशब्द इत एव भाष्या-न्नपुंसकः। "चालनी तितउः पुमानि"तिकोशात्पुल्लिङ्गोऽपि॥ **विस्तारेति।** तनोतेर्डउः सच्चेति व्युत्पत्तेरिति भावः॥ **तुन्नेति।** तुदधातोः कर्मणि डउः सच्चेति भावः। ध्यानं ज्ञातार्थभावनम्। मनसेति व्यापारपरं तदाह **प्रज्ञानेनेति॥ भाष्ये क्वेति।** किन्त्वत्र सायुज्यानि प्राप्नुवन्तीति प्रश्नः॥ **उत्तरयति य एष इति।** दुर्गमार्गप्राप्यत्वात् दुर्गमार्गत्वोपचारः। दुर्गत्वमेवाह **एकेति॥ ज्ञानेनैवेति।** निर्विकल्पकज्ञानेनेत्यर्थः। अत एव दुर्गत्वम्। "क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ती"ति श्रुतेरिति भावः॥ **भाष्ये वाग्विषय इति च्छेदः।** अत एव श्रवणोपपत्तिः। वाग्वेदरूपाच्च॥

१ छेद इति नास्ति॥ ख॥ वस्तुतः "छेदः" इति पाठ उत्तरग्रन्थस्य श्रवण-प्रत्यक्षोपपत्तिपरत्वभ्रान्तिमता केनचित् संनिवेशितोऽनुचित एव॥ उत्तरग्रन्थस्य तु "अतएव" वाग्विषयत्वादेव। "श्रवणोपपत्तिः"। "आत्मा वा अरे द्रष्टव्यः श्रोतव्य" इति श्रुयुक्तस्य श्रवणस्योपपत्तिरित्यर्थः। "यतो वाचो निवर्तन्ते" इति वाग्विषयत्वोक्तिस्तु फलव्याप्यत्वनिरुक्त्यभि-प्रायिकेति तात्पर्यम्। तदुक्तं पञ्चदश्यां "फलव्याप्यत्वमेवात्र ग्राह्यबुद्धि-र्निवर्त्तितम्" इति॥

वेदान्तेष्विति। सत्यञ्ज्ञानमित्यादिषु। **परमार्थसंविल्लक्षणा** परमार्थब्रह्ममात्रविषयज्ञानविषयाखण्डार्थरूपा यैषां वाचि निहितेत्यर्थः। सर्वोऽपि वेदस्तेषाम् ब्रह्मपरः। "वेदैश्च सर्वैरहमेव वेद्य" इत्युक्तेरिति भावः। अयम्भावः ये शास्त्रतः प्रकृतिप्रत्ययविभागेन साधून् ज्ञात्वा शास्त्रार्थध्यानवन्तो मानसज्ञानेन वाचमसाधुभ्यः पृथक्कृतवन्तस्ते तज्ज्ञानपूर्वकसाधुशब्दप्रयोगैर्लब्धान्तः करणशुद्धयोऽत्र य एष दुर्गो मार्गो ब्रह्मरूपस्तचात्मना सह समानख्यातयस्यैक्यभेदभावनाः सख्यानि सायुज्यानि प्राप्नुवते यत एषां वाचि वेदाख्ये ब्रह्मणि भद्रा लक्ष्मीः सर्वभासकब्रह्मरूपा सा अधि अधिकनिहिता भवति एतच्छास्त्रसाध्यप्रयोगव्यङ्ग्यस्य ध्वनिरूपवैखरीरूपरूपितस्यैव तैर्वाचकत्वस्वीकारेण तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचित एव बोधकतया तैर्ग्रहात् एवं सर्वबोधकेषु ब्रह्मबुद्धौ जातायान्तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मबुद्धिर्वैयाकरणानामिति। यत्तु पदपदार्थवाक्यार्थमर्यादया सत्यमित्यादितस्तेषान्तद्बोधात्सातेषां वाचि निहितेति तन्न "यतो वाचो निवर्त्तन्ते अप्राप्यमनसा सहे"ति श्रुत्या ब्रह्मणस्तन्मर्यादया शब्दावोध्यत्वोक्तेः। तत्र हि अप्राप्येत्यस्य सम्बन्धज्ञानेऽविषयीभूयासम्बन्ध्य चेत्यर्थः। आद्यं शब्देऽन्यमनसिशुद्धचित्तस्य तूभयमपि बोधकमखण्डविषयस्य "दृश्यतेत्वग्रयाबुद्धे"ति श्रुत्यन्तरात्। न तु पदपदार्थमर्यादयेति बोध्यम्॥ **लक्षणादित्यस्य** व्याख्या **भासनादिति परिवृढा** अज्ञाननिवर्त्तनेन प्रभवो एते च मन्त्राः सर्वानुक्रमेऽन्यत्र विनियुक्ता अपि भाष्यप्रामाण्यादेतत्तात्पर्यका अपीति बोध्यम्॥ **चत्वारीत्यादि**

ऋक् चतुष्टयं व्याकरणस्य मोक्षजनकत्वमतिपादयति ॥ **भवार्थ इति**। प्रायश्चित्तसाधनत्वेन तद्भवत्वम् ॥

पञ्चमीतियोगविभागादिति। सुप्सुपेति तु युक्तम् ॥ ननु दृग्म्यामुच्चस्येति प्रयोजनस्वरूपगणने भाष्ये उक्तम्। गृह्येऽपि तथैव पठ्यते अतो दृग्म्युत्तरकालमित्ययुक्तमत आह **तैरपीति** ॥ **शिक्षायामिति**। ते च हृग्रः। अन्तरन्तस्था यस्येत्यर्थः ॥ **चिपुरुषानूकम्**। चिपुरुषशब्दे द्विगुः मूलविभुजादित्वात्कः ॥ **भाष्येऽनरीति**। अमनुष्येऽरिभिन्ने इतिवार्थः ॥ **सत्यदेव इति**। [1]वरुणे यथा सत्येन दीव्यति द्योतत इति यौगिकोऽयं शब्दस्तथान्येष्वपीत्यर्थः। यस्येति पञ्चमीस्थाने षष्ठी यस्मात्ते काकुदन्तालु प्राप्य सिन्ध्वस्सप्तसमुद्ररूपाः सप्त विभक्तयोऽनुचरन्ति प्रकाशन्ते इत्यर्थः ॥ **अनेकार्थत्वादिति**। वदेरधिकरणे घञर्थे [2]इति कः [3]शकन्ध्वत्वररूपम् पृषोदरादित्वाद्वैकस्योकारस्य लोपः। नुदेर्व्याधिकरणे कः पृषोदरादित्वान्नुलोपः ॥ **सूर्मिं** शोभनामयः प्रतिमाम्। **सुषिराम्** ऊषसुषीति रप्रत्ययेन सच्छिद्राम्रविश्वाऽग्निर्यथा तत्त्वं मलमपास्योक्त्य प्रतिमां शुद्धाङ्करोति एवन्तालुदेशे प्रकाशमाप्य [4]विभक्त्यन्ताश्शब्दाश्शारीरमपापमपाकुर्वन्तीत्यर्थः। अनेन स्वर्गप्राप्तिः फलमित्युक्तम् ॥ **एवन्तर्हीति**। वेदातिरिक्तविषय एव प्रयोजनान्याख्यानन्तु वेदविषय इत्येवं रूपं विषयविभागम्। तृतीयस्य प्रश्न

---

१ डक्टर वालेण्टाइन मुद्रितपुस्तके "वरुणः" इति प्रथमान्तपाठो दृश्यते परन्तु स आपातपतित इति मन्ये "अन्येष्वपि" इति उपमेये सप्तमी दर्शनात् ॥ २ "इति" इति नास्ति ॥ ख ॥

३ शकन्ध्वादित्वात्यररूपम् ॥ क ॥ ४ विभक्तय इत्यधिकम् ॥ क ॥ ख ॥

दत्यन्ये ॥ किञ्चित्पदार्थमाह **वेदमपीति**। शेषपूरणमन्यत् किन्तत्किञ्चिदित्याकाङ्क्षायामाह्ये **ओमित्युक्तेति**। पठन्तीत्यनन्तरमेतेभ्योऽपीतिशेषः। एवञ्च वेदमधिजिगांसमानेभ्यो वेदाध्ययनप्रयोजनङ्किमिति नाचाख्यायते इति प्रश्नः। वेदाध्ययनवद्व्याकरणाध्ययनमपि प्रयोजनमन्तरैव करिष्यन्तीति प्रयोजनविचारो व्यर्थ इति तात्पर्यम् ॥ नन्वोमित्यधिकमित्याह **अभ्युपगम्येति**। विनैव प्रयोजनज्ञानमिति शेषः ॥ भाष्ये उत्तरमाह **पुराकल्पे इति**। युगान्तरे इत्यर्थः ॥ **संस्कार** उपनयनम् ॥ **करणम्** आभ्यन्तरप्रयत्नः ॥ **अनुप्रदानन्नादादिवाच्चप्रयत्नः**। तेनाधीतव्याकरणग्रन्थेभ्य इत्यर्थः। ते तदानीमपि कर्मानुष्ठानफलकत्वं वेदस्य जानन्तो नित्यत्वं वा तदध्ययनस्य जानन्तो न तदध्ययनप्रयोजनमपृच्छन्तीति न कदाचिदपि वेदाध्ययनप्रयोजनोपदेश इति तात्पर्यम् ॥ **न तथेति**। किन्तु विपरीतमित्यर्थः ॥ भाष्ये आचार्यपदेन शास्त्राध्यापको भाष्यकृदेव विवक्षितः ॥ **इदं शास्त्रमिति**। प्रयोजनाचाख्यानमित्यर्थः ॥ **भाष्ये उक्तशब्द इति**। लौकिकानाञ्चेत्यनेन विषयभूतशब्द उक्त इत्यर्थः ॥ **स्वरूपमपीति**। अथ गौरित्यादिना अयमुपसंहारो ग्रन्थस्य विषयप्रयोजननिरूपणमेतावता कृतमिति बोधयितुम् तेनैव सम्बन्धाधिकारिणावुक्ताविति [1]पृथङ्नोक्तौ ॥ किं यत्तच्छोऽन्यत्र उतरामावादाह **अन्यतरान्येति**। तच्च सुशब्दोपदेशः प्रयोगविध्यर्थोऽनुवादः अपशब्दोपदेशस्तु प्रयोगप्रतिषेधार्थः ॥ पञ्चपञ्चनखा इत्यस्य नियमसन्दर्शयति। **अर्थित्वा-**

---

१ तो इत्यधिकम् ॥ क ॥ ख ॥

दिति। नियम्यमानम् पुनः शब्देन बोध्यमानमित्यर्थः। नन्वस्य परिसङ्ख्यात्वात्कथन्नियमत्वेन व्यवहारोऽस्ति च नियमपरिसङ्ख्ययोर्भेदः पाक्षिकाप्राप्तिकाप्राप्तांशपरिपूरणफलो नियमः। अन्यनिवृत्तिफला च परिसङ्ख्येति चेन्न नियमेऽप्राप्तांशपरिपूरणरूपफलबोधनद्वारा-ऽर्थान्यनिवृत्तेः सत्त्वेनाभेदमाश्रित्योक्तेः॥ **विधिरिति**। अपूर्वविधिरित्यर्थः। येतु पञ्चपदस्य तदतिरिक्ते लक्षणा भक्ष्यपदस्य-चाभक्ष्ये सेति वदन्ति तेषाम्पदद्वये लक्षणागौरवम् अस्त्येव नियमत्वेन [1]भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यत इति भाष्यविरोधश्च नियमपदस्य तद्बोधके लक्षणायां स्त्येव दोषः। अचरास्सारस्यञ्च नियम्यमानभक्षणं सामर्थ्यादन्येभ्यो निवर्त्तत इति कैयटासङ्गतिश्च दृष्टान्तदार्ष्टान्तिकयोरत्यन्तवैषम्यापत्तिश्च अन्यनिवृत्तिफला परिसङ्ख्येति अभियुक्तोक्तिविरोधश्च सिद्धस्य पुनर्विधानात्प्रापकप्रमाणस्य तदितराविषयत्वरूपसङ्कोचकत्वनन्तेनान्येषामभक्षणाभावः तद्भक्षणे प्रायश्चित्तञ्च सिद्धति। एव समभिव्याहारे सोऽपि स्फुटमस्यार्थस्यैव द्योतकोऽन्ययोगव्यवच्छेद एवकारार्थ इति तु सामान्यप्रमाणसङ्कोचफलितमर्थमादाय नेयम्। **भक्ष्यनियम इति** भक्ष्यानुमतिरूप उपदेश इत्यर्थः। भाष्ये **प्रतिपत्तावित्यस्योपायभूत इति** शेषः॥ **अनभ्युपाय इति**। तत्त्वज्ञानकत्वेन कल्पाभिमतानभ्युपायत्वात्॥ तचार्थवादमाह **दृहस्पतिरिति**॥ ननु शब्दानामिति पुनरुक्तमत आह **योगरूढ इति**॥ अर्थपौनरुक्त्यमाशङ्क्य निराकरोति **तत्रेति**॥ ननु यावदेवाधीयते तावदेवाभ्युपयुक्तं स्यादत आह

---

१ भक्ष्यनियमत्वेन॥ क॥

भाष्ये **चतुर्भिरिति** ॥ उक्तमेव तदाशयमाह **एकदेशेत्यादि** । विद्योपयोगाधारभूतानाङ्कालानां विद्याप्रत्ययाधारत्वात्तस्य च करणत्वविवक्षा बोध्या चतुर्षु कालेषु विद्योपयुज्यते इति फलितोऽर्थः । तत्राद्ययोर्विद्यार्थ्ययम्बुद्धिमानित्यादरपूर्वकमन्नवस्त्रादिलाभरूपोपयोगः । तृतीये प्रतिष्ठा सच्छिष्यलाभद्वारार्थप्राप्तिः सत्कारविशेषश्च । चतुर्थे यज्ञाद्यनुष्ठानकालेऽपशब्दप्रयोगप्रयुक्तप्रायश्चित्ताभावः कर्मसाङ्गता दक्षिणालाभः प्रतिष्ठाचेत्युपयोगः तादृशस्योपयोगस्सर्वाध्ययन एव ॥ **भाष्ये पर्युपयुक्तमिति** । समाप्तमित्यर्थः । पर्यवसन्नमिति पाठान्तरम् । न चेष्टापत्तिः विद्योच्छेदापत्तेः । कर्मसु प्रायश्चित्तविधिवैयर्थ्यापत्तेश्च । ननु तदात्मकत्वात्तत्रणस्य मतोरनुपपत्तिरत आह **सामान्यविशेषाविति** । लक्षणं शास्त्रमित्यर्थः ॥ **भाष्ये कथञ्जातीयक इति** । केन प्रकारेणेत्यर्थः । एतेनैवञ्जातीयकेन शास्त्रेण सुशब्दोपदेशप्रवृत्तिः पाणिनेरुचितेति सूचितम् ॥ **आकृतिपक्ष इति** । तत्र उद्देश्यतावच्छेदकजात्याक्रान्ते क्वचिच्चरितार्थयोर्द्वयोः सत्प्रतिपक्षन्यायेन विरोधस्थले उभयोरप्यप्राप्तौ विप्रतिषेधे परमिति विध्यर्थन्नतु नियमार्थमिति सकृद्गताविति न सिध्यति व्यक्तौ तु [1]तद्भक्तिविषययोरपि[2] शास्त्रयोरचारितार्थ्यात्यर्थायेणोभयप्राप्तौ नियमार्थन्तदिति पुनः प्रसङ्गेत्यादि न सिद्ध्यतीत्यर्थः । [3]इदञ्च विप्रतिषेधसूत्रे[4]निरूपयिष्यते ॥ **तस्याम्प्रतीता-**

---

१ तत्तद्भक्ति ॥ क ॥ २ "विषययोरपि" इति नास्ति ॥ ख ॥

३ "इदञ्च विप्रतिषेधसूत्रे निरूपयिष्यते" इति नास्ति ॥ ख ॥

४ दूषयिष्यते ॥ क ॥

यामिति। शब्दशक्त्यवेन गृहीतायामित्यर्थः। एवमभिदधतीत्यस्याभिधाविषयत्वेन गृह्णन्तीत्यर्थः। तदावेशात्तत्समवायात्॥ **प्रतीयत इति**। अविनाभावाच्छब्दजन्यबोधविषयो भवतीत्यर्थः। प्रत्ययो ज्ञानम्॥ **उपलक्षणभावेनेति**। शक्यतावच्छेदकत्वेनेत्यर्थः। तच्च तु न शक्तिरिति मञ्जूषायाम्प्रतिपादितम्॥ **भाष्ये जात्याख्यायामिति**। व्यक्तौ पदार्थे सम्पन्ना व्रीहय इति व्यक्तिवज्जात्यादुज्ञवचनं सिद्धमेवेति व्यर्थन्तत्स्यादिति भावः॥ **सरूपाणामिति**। आकृतेरेकत्वादेवैकशब्दप्रयोगोपपत्तौ तदुक्तिसम्भवो व्यक्तिपक्ष एवेतिभावः। नचाकृतिपक्षेऽपि अक्षाः पादा इत्याद्यर्थं स आवश्यक इति वाच्यम् तावतीषु काश्चिदेकाञ्जातिं स्वीकृत्य तस्या एव शब्दवाच्यत्वम् [1]परम्परयाच व्यक्तिप्रत्यय इति सरूपसूत्रे कैयटेनैव वक्ष्यमाणत्वात्। जातौ न जातिरिति परेषामुद्भावनन्नास्माकमिति च तत्रोक्तम्॥ **विप्रतिपत्त्येति**। शब्दानान्नित्यत्वे व्यर्थं व्याकरणशास्त्रमिति प्रश्नाशयः। **केचित् मीमांसकाः**॥ **वर्णात्मकमिति**। पदवाक्ये च वर्णसमूहरूपे एवेतितदाशयः। अत्र मते एकस्मिन्पटपदमित्याद्यनुपपत्तेराह **अन्ये**। वैयाकरणाः॥ **अपरे**। त एव मुख्याः पदे वर्णानामिव वाक्ये पदानाङ्कल्पितत्वात्तेषामर्थवत्त्वमपि काल्पनिकमिति वाक्यस्यैव शब्दत्वमिति तद्भावः॥

अन्येत्विति। वैशेषिकादयः॥ **ध्वनिरिति**। स च वर्णावर्णात्मकत्वेन द्विविधः एवञ्च कण्ठादिवच्छास्त्रमपि तस्य कारण-

---

१ परम्परया च॥ क॥

मित्याशयः॥ **सङ्ग्रहो** व्याडिकृतो लक्षश्लोकमञ्जो ग्रन्थ इति प्रसिद्धिः॥ **भाष्ये उभयथापीति**। एवञ्च निष्फलोऽयं विचार इतिभावः। साधुत्वज्ञानाद्योभयथापि शास्त्रमावश्यकमिति तात्पर्यम्॥

अथ पाणिनिसूत्रव्याख्यानभूतं वार्त्तिकमवतारयति **कथम्पुनरिति**। अतएवाचैव पाणिनिनामग्रहणम् इतः पूर्वन्तु [1]सर्ववार्त्तिकशास्त्रान्वाख्यानप्रयोजनविषयप्रदर्शनपरो भाष्यकारस्यैव ग्रन्थ इतिबोध्यम्॥ **शब्दार्थसम्बन्धानामिति**। [2]शब्दाश्चार्थाश्च सम्बन्धाश्चेति द्वन्द्वः। एवञ्च किमपूर्वशब्दनिष्पादनद्वारार्थविशेषसम्बन्धनिष्पादकत्वं शास्त्रस्य किं वा सिद्धशब्दार्थसम्बन्धबोधकत्वमिति प्रश्नार्थ इतितात्पर्य्यम्। **सिद्धे शब्दार्थसम्बन्ध** इति वार्त्तिके समाहारद्वन्द्वात्सप्तमी सम्बन्धस्य प्रत्यासत्त्या शब्दार्थयोरेव त्रयाणामात्यन्तिकाविश्लेषप्रदर्शनाय समाहारनिर्देश इति बोध्यम्॥ **व्यक्तिस्फोटेति**। सा पदवाक्यरूपा नित्यैवेति तद्भावः। एतच्चोपपादितप्राक्॥ **कार्य्यशब्दिकानामिति**। कार्य्यशाब्दिकानामितित्वपपाठः। उत्तरपदवृद्धेर्दुर्लभत्वात्॥ **असत्योपाधीति**। जातिरूपेत्यर्थः। जातिर्हि तन्मते आविद्यको धर्मविशेषः। यद्वा सर्वेषान्धर्माणामब्रह्मण्यध्यस्तत्वेन शुक्तिरजतादिज्ञाने शुक्त्यादीनां विशेष्यत्ववत्सर्वत्राधिष्ठानभूतब्रह्मैव विशेष्यम् विशेष्यमेव च द्रव्यमितिभावः॥ शब्दार्थयोर्नित्यत्वपक्षे तत्सम्बन्धस्य नित्यत्वे ऽप्यनित्यत्वपक्षे कथं सम्बन्धस्य नित्यत्वमत आह **सम्बन्धस्येति**। प्रवाहनित्यतया

---

१ पूर्वन्तु वार्त्तिक॥ ख॥ २ शब्दाश्चार्थश्च॥ ख॥

तयोरिव तस्यापि नित्यत्वमितिभावः। शब्दार्थयोस्सम्बन्धस्य शक्तिरूपत्वादात्मवेत्यन्यत्र प्रपञ्चितम्॥ **भाष्ये सिद्धशब्दस्य कः पदार्थ इति।** अत्र पदार्थशब्दो रूढः सिद्धशब्दसम्बन्धी कः पदार्थ इत्यर्थः॥ **कूटस्थेष्विति।** कूटमयोघनस्तद्वत्तिष्ठन्ति ये तेषु संसर्गिनाग्नेऽपि स्वयमनष्टेष्वित्यर्थः। नन्वयोघनस्यापि तर्हि नित्यत्वं स्यादत आह [1]**अविचालिष्विति।** भाष्ये [2]द्यावापृथिव्यादावपि व्यावहारिकनित्यत्वाभिप्रायेण दृष्टान्तितम् आकाशस्यापि व्यावहारिकनित्यत्वमेवाचार्याभिमतम् एवञ्च तत्र रूढत्वान्नित्यवाचकस्यैव ग्रहणमितिभावः॥

ग्रन्थान्तरानालोचनेऽपि नियामकमाह **भाष्ये अथवेति।** एतेन तत्समानतन्त्रत्वाद्युक्त्येकपदार्थवादोऽपि तव स्यादित्यपास्तम्॥ नन्वेकपदान्यपीत्युक्ताऽञ्च इत्यस्य पदद्वयात्मकस्योदाहरणमसङ्गतमत आह **एव शब्देति॥** नियामकप्रत्यायकसामर्थ्यन्दर्शयति। **इहापीति॥** कार्य्यवाचिन एव ग्रहणाभावे मूलमाह **कार्य्याणामिति॥ प्राक्प्रध्वंसयोरिति पाठः॥**

भाष्येऽप एवेति। गम्यत इति वाक्ये इव समासेऽपि सामर्थ्यात्तदतिरिक्तभक्षणाभावो गम्यत इत्यर्थः॥ **अथवेति।** मनुष्यवृक्षाद्यपेक्षयाकाशादीनामप्यत्यन्तसिद्धत्वमितिभावः॥ **प्रतीयमानस्येति।** एतदणुदित्सूत्रे उपपादयिष्यते॥ **एवन्तर्हीति।** एवमेव घटपदङ्कलशपर्याय इत्यादिप्रयोगाः। अन्यथा पर्यायवाचीति

---

१ अविचारिष्विति॥ ख॥ २ द्यावापृथिव्यादिकमपि॥ ख॥

३ उदाहरणत्वम्॥ क॥

प्रयोज्यं स्यात्॥ विनापि प्रत्ययस्यूर्वोत्तरपदयोर्लोप इति लोपविधायकत्वर्हि किमर्थमत आह **लोपस्त्विति**। वर्णानाम् दे इत्यादीनाम्। तत्रापि क्वचित्पूर्वपदस्यैव क्वचिदुत्तरपदस्यैव क्वचिदुभयोरिति लोकव्यवहारेण निर्णेयम् एवं वर्णानां [१]ग्राह्यभावोऽपि [२]तेनैव निर्णेय इति तत्त्वम्॥ **निष्पन्नत्वेति**। विद्यमानकालसम्बन्धो निष्पन्नत्वम्॥ ननु निर्युक्तिकं व्याख्यानमयुक्तं विपरीतस्यापि सम्भवादत आह **न्यायादिति**। वृद्धव्यवहारादेव पदार्थसम्बन्धानान्नित्यत्वं सङ्गृहादौ स्थितमिति व्याख्यानतस्मिद्धशब्देन तदेवोपात्तमित्यर्थः॥ **सिद्धिर्मङ्गलमिति**। तस्या मङ्गलत्वञ्च कार्ये कारणरूपोपचारादिति बोध्यम्। तत्प्रयोजनमस्येति प्राग्वतीयष्ठञ्॥ तत्र मङ्गलानुष्ठानप्रयोजनमाह **भाष्ये मङ्गलादीनीत्यादिना**॥ ग्रन्थे [३]तन्निबन्धनस्य फलमाह **अध्येतारश्चेत्यादिना**। आनुषङ्गिकमङ्गलसम्पत्त्येत्यर्थः॥ [४]**अध्ययननिर्वृत्तिः** तत्समाप्तिः॥ **सिद्धिः** सिद्धिविषयोऽर्थः। मङ्गलार्थमित्यनेनेत [५]एव वार्त्तिकप्रवृत्तिस्सूचिता असन्दिग्धो नित्यशब्दः किन्न प्रयुक्त इत्युक्तत्वापि सन्देहमाह भाष्ये **अयङ्गुल्वेति**। आभीक्ष्ण्येन बाहुल्येन अभीक्ष्ण्यमितिपाठेऽप्येवमेवार्थः॥ **प्रयुज्यन्त इति**। साधाच्छब्दे आ-

---

१ ग्राह्यभावा अपि॥ ख॥ २ अत एव॥ क॥ तत एव निर्णेया इति॥ ख॥ ३ तन्निबोधनस्य॥ क॥ ग्रन्थेन निबन्धनफलमाह॥ ख॥
४ अध्ययननिर्वृत्तिः तत्समाप्तिः। सिद्धिः सिद्धिविषयोऽर्थः। मङ्गलार्थमित्यनेनेत एव वार्त्तिकप्रवृत्तिः॥ ख॥ ५ इत्येव॥ क॥

भीक्ष्ण्यासम्भवात्प्रयोगद्वारा तद्बाह्यम् एवञ्च नित्यशब्दोपादानेऽपि सप्रयोजनकोव्यक्तरसम्भवेन तत्रापि सन्देह एवेति भावः। नित्ये शब्दार्थसम्बन्धे दृत्यस्य शब्दार्थसम्बन्धे ज्ञाते सति नित्यप्रयोगविषये शब्दे शास्त्रमप्रवृत्तमित्यर्थस्यादितितात्पर्य्यम् ॥

नन्वाभीक्ष्ण्यवाचिनो नित्यं क्रियापदसाकाङ्क्षतया कथङ्केवलस्य प्रयोगोऽत आह **विनापिचेति**। नन्वेवमर्थग्रहणं व्यर्थमत आह **द्रव्यपक्षे इति** ॥ योग्यताबोधजनकत्वयोग्यता तादात्म्यम्। तदुक्तभाष्ये **नित्योच्चार्यवतामिति**। शब्दानामित्यर्थः। ननु तादात्म्यस्य सम्बन्धत्वे कथन्तस्य नित्यत्वमितिचेन्न नष्टभाविवस्तुनोऽपि शब्देन बोधाद्बौद्धार्थेन तस्य तादात्म्यन्नित्यमित्याशयात् शब्दवृत्तिधर्मस्यैवार्थ[1]वृत्तिधर्माभेदमापन्नस्य तादात्म्यत्वेनादोषाच्च॥ **शब्दस्यच नित्यत्वादिति**। आकाशवत्तन्निष्ठश्शब्दोऽपि नित्यः। व्यञ्जकाभावात्तु न सर्वदोपलम्भ इति भावः॥ ननु घटादिद्रव्यस्य कथन्नित्यतेत्यत आह **असत्येति**। सच कम्बुग्रीवादिमदाकारादिरूपः तद्व्यञ्जजातिरूपो वा। भाष्ये यद्याकृतिशब्देन तद्व्यञ्जमुच्यते तर्हि तदप्याविद्यकत्वेन व्यञ्जकानित्यत्वेनचानित्यमित्याह **जातेरपीति**। अनेनैतत्प्रकरणस्याकृतिपदस्य व्यङ्ग्यव्यञ्जकोभयपरतां सूचयति गौतमेनाप्युक्तं "जात्याकृतिव्यक्तयः पदार्थ" इति ॥ **भाष्ये खदिराङ्गारसवर्णे कुण्डले भवत** इति प्रयोगादच्यन्ते विक्षतेः कर्त्तृत्वं बोध्यम्। आकृतिपदेन जातिरित्यभिप्रायेण

---

१ शब्दवृत्तिधर्मस्यैवार्थे ॥ ख ॥

भाष्ये आकृतावपि पदार्थ इति ॥ क्वचिदुपरतेतिकृत्वा न सर्वत्रोपरतेत्यन्वयः ॥ ननु परमोनाग्रश्चेत्तत्काले एवान्यत्र सत्त्वं विरुद्धमत आह **अनभीति ॥** ननु परमार्थदृष्ट्या सर्वमनित्यमत आह **अद्वैतेनेति ॥ नित्यत्वमिति ।** सर्वदा एकाकारपरामर्शदर्शनेन यावद्व्यवहारकालस्थास्ना अपि ध्रुवादित्वेन नित्यत्वमितिभावः ॥ अथावयवसंस्थानरूपाया जातिव्यक्तिकाया आकृतेर्यावद्व्यवहारकालमध्ये मध्ये उत्पत्तौ नाग्रेऽपि प्रकारान्तरेण नित्यत्वमाह **भाष्येऽथवेति ।** नित्यत्वलक्षणे ध्रुवपदस्यैव व्याख्यानं **कूटस्थमिति ।** रूपान्तरापत्तिर्विचालः । यथा पयसो दध्यादिरूपता। अनेन परिणामाऽनित्यता परास्ता । उत्पत्तेः सत्तापर्यन्तत्वाद्**नुत्पत्ती**त्यनेन जन्मसत्तारूपौ भावविकारौ निरस्तौ। **अवृद्धीत्य**नेन वृतीयो वृद्धिलक्षणः । अनुपजनेतिचतुर्थः परिणामः । **अनपायेति** पञ्चमोऽपचयः । एतद्रूपविकाररहितमितितदर्थः ॥ **अव्ययेति** षष्ठो विनाशः । इदञ्च ब्रह्मविषयन्नित्यत्वं यावद्व्यवहारमेकरूपस्थितपदार्थविषयञ्च ॥ अयमेव न नित्यशब्दार्थः प्रवाहाविच्छेदेऽतादृश्यपि नित्यत्वव्यवहारादित्याह **भाष्ये [१]यस्मिँस्तत्त्वमिति ।**[१] यस्मिन्विहतेऽपि तत्त्वं तद्धर्मः[२] प्रवाहनित्यताचानेनोक्ता तन्नाग्रेऽपि तद्धर्मो न नश्यति आश्रयप्रवाहाविच्छेदादितिभावः ॥ **यन्नित्यमिति ।** व्यक्तिजात्याकृतीनामध्ये यन्नित्यमित्यर्थः ॥ ननु

---

१ तदपीतीत्यधिकम् ॥ क ॥ ख ॥ २ यस्मिन् इत्यारभ्य इति भाव इत्यन्तं नास्ति ॥ ख ॥ ३ यस्मिन्विहतेऽपि तत्त्वं तद्धर्म इति नास्ति ॥ क ॥

शशशृङ्गादिपदार्थानाङ्कथन्नित्यत्वन्तेषां स्वरूपस्यैवाभावादत आह **बुद्धिप्रतिभास इति**। वाह्यः पदार्थो न शाब्दबोधे विषयः किन्तु बौद्धः स च प्रवाहनित्य इति भावः। एतच्च मञ्जूषायां विस्तरेण निरूपितम्॥ **शब्दादीनान्नित्यत्वमिति**। व्याकरणानिष्पाद्यत्वमित्यर्थः॥ **तावत्येवेति**। वैयाकरणकुलमगत्वैवेत्यर्थः॥ ननु सकृदन्वितस्य लोकत इत्यस्य पुनरर्थप्रयुक्त इत्यनेनान्वयः कथम्। वार्त्तिकेचैकवाक्यतयैवान्वयः प्रतीयतेऽत आह **अचेति**॥ **अनाश्रित्येति**। न्यूनतापरिहारायेत्यर्थः॥ **लोकत इत्यस्य च लोकव्यवहारत इत्यर्थः**॥ **भाष्येऽर्थप्रयुक्त इति**। अर्थज्ञानप्रयोजनेन कृत इत्यर्थः। परस्य विशिष्टार्थबोधोभवतितिशब्दः प्रयुज्यते। प्रयोगेणाविर्भूतशब्दज्ञानेनार्थज्ञानादितिभावः। एवमाप्ते शब्दप्रयोगेशास्त्रेणास्येयमकृतिरयमत्यय इत्यादिप्रकृत्यादिविभागज्ञानद्वारा गवादय एव प्रयुक्ता धर्मजनका न गाव्यादय इति नियमः क्रियते इति तात्पर्यम्॥ **विधानादिति**। तादर्थ्यस्य षष्ठ्यर्थत्वबोधनायत्वेवमप्रयोग इतिभावः॥ **चतुर्थीति**। योगविभागो न भाष्यारूढः सुप्सुपेति समास इत्यप्यगतिकगतिरित्येवं व्याख्यातम्॥ द्वितीयपक्षात्तृतीये विशेषं दर्शयति। **लिङादीति**। प्रभाकरास्वीकृतमतेनेदम्। तन्मते हि लिङादीनामपूर्वरूपङ्कार्यं वाच्यम्। तदेवच स्वस्मिन् पुरुषमप्रयुञ्जानन्नियोग इत्युच्यते स एव धर्मस्तेन प्रयुज्यते आक्षिप्यत इति कर्मण्युडन्तः प्रयोजनशब्दः सचासाधुनिवृत्तिरूपो नियमः धर्मप्रयोजन इति षष्ठीसमासः। एवञ्च द्वितीये धर्मफलको नियम इत्यर्थः। तृतीये धर्मप्रयोज्य

इत्यर्थ इति भेदः। केचित्तु धर्माय नियम इत्यनेन प्रत्यवायपरिहार[1]धर्मायायं नियमः। असाधुप्रयोगेऽधर्मोत्पत्तेः। धर्मार्थो नियम इत्यनेन धर्मस्य यज्ञादेरङ्गभूत इत्यर्थः। नानृतं वदेदिति क्रतुवङ्गवाक्येन[2] क्रतुवैगुण्यबोधनात् धर्मप्रयोजनो नियम इत्यनेनैकशब्द इति श्रुतेर्नियमादृष्टस्मुरुषार्थकरं सूचितमित्याहुः॥ नन्वीदृशो धर्मनियमः क्व दृष्टोऽत आह भाष्ये **यथेति**॥ ननु लोकवेदयोरित्येव सिद्धे तद्धितनिर्देशोऽयुक्तोऽत आह **प्रियतद्धिता इति**॥ नन्वन्यार्थेऽन्यशब्दप्रयोगेऽपशब्दत्वं स्यादत आह **नार्यमिति**॥ **ते[3]लोकवेदेति**। अवयवे समुदायशब्दप्रयोगदर्शनादितिभावः॥ **आधाराधेयकल्पनयात्विति**। लोकरूपसमुदायतदवयवयोरित्यादिः॥

नाचावयवावयविविभाग इति। तत्र भव इत्यादिव्यवहारप्रयोजको विभागारोपोऽवयवावयविनोर्नेत्यर्थः॥ **कृतान्तेषु**। कृतान्तः सिद्धान्तः तत्प्रतिपादकवाक्येष्वित्यर्थः॥ **भक्ष्यञ्च नामेत्यस्य** तद्भवति यदिति शेषः॥ **शक्यं क्षुदिति** सामानाधिकरण्यङ्कथं भिन्नलिङ्गत्वादत आह **शक्तेरिति**॥ **तदा क्षुधमिति**। ननु प्रधानक्रियानिरूपितशक्तेरभिधाने गुणक्रियानिरूपितशक्तेरनभिहिताया अभिहितवत्प्रकाशस्य स्वादुमिणमुलित्यत्र वक्ष्यमाणत्वेन कथमेतदितिचेन्न प्रधानतिङन्तार्थक्रियानिरूपितशक्तेरेवायं स्वभावो यत्समानाधिकरणगुणशक्तेरभिहितवत्प्रकाश इत्यभिमानात्। व-

---

१ प्रत्यवायपरिहाररूपधर्मायायं नियमः। इति समीचीनः पाठः॥

२ क्रतुवैगुण्यस्य॥ क॥ ख॥ ३ वेदलोकेति॥ ख॥

स्तुत इदमयुक्तमेवेति स्वादुमीत्यत्र निरूपयिष्यामः॥ **खेद इति।** एवञ्च ग्राम्यकुक्कुटपरदारादौ विशेषनिषेधस्येतराभ्यनुज्ञाफलकतया आरण्यतद्भक्षणस्वदारगमनयोर्यथा दोषाभावो यथाच ग्राम्यकुक्कुट-भक्षणपरदारगमनयोरधर्मस्तथा शास्त्रजनितज्ञानपूर्वके गवादिप्रयोगेऽपूर्वोत्पत्तिरूपं फलं शास्त्रेण बोध्यते तेषां साधुत्वबोधनात्। अर्थादपशब्दानामधर्मजनकत्वं बोध्यते। एकविधेस्तादितरनिषेध-फलकत्वात्। यथैकनिषेधस्यापराभ्यनुज्ञाफलकत्वमितिभावः। दृष्टान्तत्वांशेन वक्ष्यमाणवैदिकानान्तु सर्वांशेनेतिबोध्यम्॥ **व्रतयतीति।** अभ्यवहार्य्यत्वेनोपादत्ते इत्यर्थः॥ **भाष्ये उच्छित्यानुच्छित्य[1]वेति।** सन्तत्यासन्तत्य[2]वेत्यर्थः। निखन्यानिखन्य वेत्यर्थ [3]इत्यन्ये॥ ननु अपभ्रंशा न वाचकाः वाच्यप्रतीत्यन्यथानुपपत्त्या कल्प्यमानशक्तेरिष्टप्रयुक्तसंस्कृतेष्वेव कल्पनात् तदनुसारेणैव चापभ्रंशानां साधुस्मारणेन बोधकत्वोपपत्तेः समानायामित्यनुपपन्नमिति शङ्कते **यद्यपीति॥ तथापीति।** एवञ्च वाचकत्वाभावेऽप्यर्थप्रत्यायकत्वाविशेषेण समानायामित्युक्तम्॥ **निरूढिमागता इति।** तेन च शक्तिभ्रमेण बोधका इति भावः। शक्तिभ्रमश्चेत्थम्। केनचिद्गावीतिप्रयुक्ते[4] गौरितिसाधुशब्दस्मरणात्प्रयोज्यस्य बोधेऽपि तटस्थस्य गावीशब्दादेवास्य गोबोध इति भ्रमस्तन्मूलकोऽन्येषामपि भ्रम इति। वस्तुतो विनिगमनाविरहाद्भाषाशब्देष्वपि शक्तिरेवे-

---

१ चेति॥ ख॥ २ चेत्यर्थः॥ ख॥ ३ चेत्यर्थ इत्यन्ये॥ ख॥
४।गावीति युक्ते॥।ख॥

त्याह **अन्येत्विति** । साधुत्वञ्चैतन्मते शब्दगतधर्मसाधनतावच्छेदकं वैजात्यमेव यद्यपि [१]साधुनैव भाषेतेति न श्रूयते तथापि फलनिर्देशवाक्ये तच्चिर्देशादेवेदृग्विधिः कल्प्यते तत्र के साधव इति[२] व्याकरणेन प्रतिपादनात्तद्द्वारा शास्त्रेण धर्मनियमो विधीयते इति बोध्यम् ॥ **भाष्ये शब्देनैवेति** । साधुनैवेत्यर्थः ॥ **एवं क्रियमाणमिति** । शास्त्रज्ञानपूर्वकमुच्चार्यमाणमित्यर्थः ॥

अस्त्यप्रयुक्त इत्यादेः प्रकृतोपयोगमाह **प्रयोगमूलत्वादिति** । लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इत्यनेन प्रयुक्तेषु साध्वसाधुषु प्रयुक्तसाध्वन्वाख्यानेन तेषु धर्मः प्रयुक्तासाधुत्वधर्म इत्यर्थकेनेदं सूचितम् । एवञ्चाप्रयुक्तानामप्रयोगेणैवासाधुत्वानुमानादसाधूनामप्यनेनान्वाख्यानादप्रामाण्यमितिभावः । वार्त्तिकोक्तनियमानुपपत्तिश्चेत्यपि बोध्यम् ॥ **भाष्ये किमत इति** । अप्रयुक्तसत्त्वं नास्माकमनिष्टं साधुमात्रार्थत्वाद्व्याकरणस्येत्यर्थः । उत्तरम् । **प्रयोगादिति** । तथाचाप्रयोगादसाधुत्वानुमानमितिभावः । विप्रतिषिद्धमुपपादयति । **यथेति** । एवञ्च सत्त्वे प्रयोग आवश्यक एव अप्रयोगेच सत्त्वमेव न स्यादितिभावः ॥ ननु लक्षणवशेन सत्त्वं केनाप्यप्रयोगाच्चाप्रयुक्तत्वमिति न विरोधोऽतो भाष्ये **प्रयुज्ञान एवेति** ॥ ननु मया प्रयुक्तश्चेत्किम् तत्र सोपहासमाह **कश्चेदानीमिति** । स्वयमेव प्रयोगङ्कृत्वा सन्तिचाप्रयुक्ता इत्यादीनां शब्दानां प्रयोगे साधुर्योग्यस्यादित्यर्थः । तत्प्रयोगेणैव प्रयुक्तत्वाव-

---

१ साधूनेव ॥ क ॥ ख ॥

२ आकाङ्क्षायाम् एते एव साधव इति ॥ क ॥ ख ॥

गमेऽप्रयुक्तत्वोक्तिर्विरुद्धेतिभावः। ननु लोकान्तर्भूतस्य नत्वं लोक इतिवद्यो विरुद्धमत आह **यथेति**। अर्थबोधाय शब्दान्प्रयुञ्जानो हि मम लोकत्वेनाभिमत इत्यर्थः। **भाष्येऽर्थे शब्दप्रयोगादिति**। अर्थविषयकज्ञानाय शब्दप्रयोगादित्यर्थः। तदाशयमाह **अर्थसद्भाव इति॥ भाष्ये प्रयोगान्यत्वादिति**। प्रयुज्यत इति प्रयोगः शब्दः सोऽन्यो यस्यार्थस्यास्ति तत्त्वादित्यर्थः। सर्वनाम्नः परनिपातः पूर्वनिपातप्रकरणानित्यत्वात्॥ **पदान्तरसहित इति**। पदान्तरं क्व युयमिति। तच्च क्रियत्वेन साधनपारोच्यं निष्ठया भूतत्वकर्तृत्वञ्च। यूयमित्यनेन मध्यमपुरुषबोध्यमाभिमुख्यं चेतनत्वं वा कर्तृत्वञ्च। वसेः साचाद्गत्यर्थाकर्मकत्वेऽपि निर्देशान्तरतेर्गत्यर्थत्वात्कर्त्तरि क्तः। नन्वाख्याते क्रियाविशेष्यको बोधोऽपि च कर्तृविशेष्यक इति कथं [1]लिङन्तसमानार्थत्वमितिचेन्न। विषयतायाविशेषानादरेण तथोक्तेः। नचाख्याते क्रियाविशेष्यकबोधे पच्यति भवति अपाचीद्भवतीति भूवादिसूत्रस्थभाष्यप्रयोग[2]विरोधः। अतीतानागतपाककर्तृकसत्तायाः वर्त्तमानत्वाभङ्गतेरितिवाच्यम्। वर्त्तमानसामीप्ये तच्च लटस्मृत्वात्। "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इत्यादौ यत्कर्तृको यागस्तत्कर्तृकं तरणमितिबोधः। अत एव **ह्रस्वो नपुंसक** इतिसूत्रे रमते ब्राह्मणकुलमिति क्रियाप्रधानमितिभाष्ये उक्तम्॥

नन्वप्रयुक्तानुशासने निर्मूलत्वाच्छास्त्रस्याप्रामाण्यं स्यादत आह

---

१ तिङन्तसमानार्थत्वम्॥ क॥

२ भाष्यविरोधः॥ ख॥

सम्प्रतीति। पाणिनेर्व्याकरणप्रणयनकाल इत्यर्थः। पूर्वप्रयोगसत्ताच्च व्याकरणप्रणयनादेवानुमीयते इतिभावः। इदमपि यच्च भाष्यवार्त्तिककाराभ्यामप्रयुक्तत्वमुक्तं तदभिप्रायकमनुमानं बोध्यम्॥ [१]**वार्षगणिकानीति**। वर्षगण्यो दिवसपरः यथाश्रुत एव वा॥ [२]**आहरति**। सामर्थ्यभावादिति भावः॥

ननु सत्त्वाणां वक्तृयजमानकानामृषिभिर्वसिष्ठादिभिस्मदीयमानत्वाभावादृषिसम्प्रदाय इत्ययुक्तमत आह **वेदेति**। भाष्ये **कृत्वेत्यनन्तरमधीयत** इति शेषः। याज्ञिकास्तु कल्पसूत्रेणान्वाचचक्षत इत्यर्थः। अत्र सत्त्वाणाङ्कर्मत्वम्। अनुपलब्ध्याचाप्रयुक्तत्वं शङ्कते भाष्ये **नचैवेति**। इतरश्लोकापेक्षया वसुमत्यां शब्दबाहुल्यात्तस्याः पृथग्ग्रहणम्। अनेनान्त्यपातालपर्य्यन्तसङ्ग्रहः। त्रयो श्लोकाः स्वस्वेनोपरितनसकलसङ्ग्रहः। रहस्यमुपनिषद् मन्त्रादिस्मृतयो वा। वेदनिगूढार्थप्रकाशकत्वात्। एवञ्च देशान्तरशब्दशास्त्रान्तरवेदान्तरोपलक्षक इतिबोध्यम्॥

भाष्ये **हम्मतिरित्यत्र** च **रंहतिरित्यत्र** च गतिकर्मेत्यनुकर्षः॥ [३]**दातिर्लवनार्थ इति**। क्तिन्नन्तं क्तिजन्तं वा लवनेऽर्थे दातिशब्दमाचार्याः प्रयुञ्जते। तत्रार्थे दात्रशब्दमुदीच्या इत्यर्थः॥ वार्त्तिकोक्तो धर्मनियमः श्रुतिसिद्धस्तस्यासुभयोरश्रवणात्रश्च इत्याह **एकपुंशब्द इति**। तत्र यदैकस्मादपूर्वन्नदेतरत्तदर्थमितिन्यायाद्वयोस्साम्येन फलसम्बन्धाभावादिकल्पायोगेनैकस्य प्राधान्यम-

---

१ भाष्ये वार्षगणिकानीति॥ २ भाष्ये आहरतीत्यपि॥

३ भाष्ये दातिर्लवनार्थे इति॥

परस्याङ्गत्वङ्कल्प्यम्। तच्च प्रथमं वा नियम्येतेतिन्यायाश्रयेणाह **तच्च किमिति** ॥

सर्वत्रैव हि विज्ञानं संस्कारित्वेन गम्यते।
परार्थङ्ग्रात्मविज्ञानादन्यत्रेत्यवधार्य्यताम् ॥

इति न्यायेन ज्ञानस्य ज्ञेयशेषतया धर्महेतुत्वाभावात्प्रयोगाङ्गतया दृष्टार्थत्वाच्च प्रयोगस्य फलस्मृतिसन्निहितत्वाच्चाह **आहोस्विदिति** ॥ **यथा श्लेष्मण इति**। तथा धर्मजनकज्ञानविपरीतत्वात्तद्विपरीतजनकत्वेनापशब्दज्ञानादधर्मप्राप्तिरित्यर्थः ॥ **प्रयोगे इति**। एवञ्च प्रयोगादेवाधर्मवद्धर्मोऽपीतिज्ञानाद्धर्म इति वेदविरुद्धमितिभावः ॥

भाष्ये फलाद्व्यतिरेच्च इति। फलवद्दृत्त्यभावप्रतियोगी न कार्य इत्यर्थः ॥ [1]**प्रयत्नवैयर्थ्यमिति**। व्याकरणाध्ययनविषयकप्रयत्नवैयर्थ्यमित्यर्थः ॥ [2]**साधीय इति** क्रियाविशेषणम् ॥ शास्त्रसंस्कारवतामभूतशब्दप्रयोगजन्यवक्रपूर्वद्वारा[3] बलवत्तराभ्युदयफलत्वमित्यर्थः। **भाष्ये तच्च फलव्यतिरेक इति**। कौशलव्यतिरेकवत् फलव्यतिरेकोऽपि स्यादिति तस्य व्याकरणाध्ययनं व्यर्थमेव स्यादितिभावः॥ [4]**शास्त्रपूर्वके इति**। व्याकरणाध्ययनपूर्वके इत्यर्थः। तच्च वेदाङ्गत्वादेतद्व्याकरणाध्ययनपूर्वकप्रयोगे एव धर्म इति प्रामाणिकाः॥

वेदशब्द इति। बोधक इत्यर्थः। प्रमाणमित्यर्थो वा ॥

---

१ नागेशभट्टीयकैयटपुस्तके एवमस्तीत्यनुमीयते ॥

२ भाष्ये साधीय इति ॥ ३ वक्रपूर्वद्वाराभ्युदययुक्तत्वमित्यर्थः ॥ ख ॥

४ भाष्ये शास्त्रपूर्वके इति ॥

तस्य यथेति। तस्य यथा **य उ चैनमेवं वेदेति** ग्रन्थेन वेदतो ज्ञात्वानुष्ठानस्फलायोक्तम्। तथास्यापि शास्त्रज्ञानपूर्वकः प्रयोगः फलायेत्येकशब्द इत्यादिनोक्तमित्यर्थः[1]॥ **भाष्ये प्रमाणमिति**। प्रामाणिकमित्यर्थः॥ [2]**शब्दश्च शब्दज्ञाने इति**। एकशब्दस्य-स्यज्ञात इत्यादिः। हेलयो हेलय इत्यादितु अपशब्दप्रयोगेऽधर्म-माह न तु ज्ञान इति भावः। यद्यपि तत्र प्रयुक्त इत्यप्युक्तन्-याय्यवैयाकरणस्य सम्यक् प्रयोगादपि धर्माभावेन ज्ञानमेव तद्धेतुः प्रयोगस्तु तस्य द्वारमिति भावः॥

भाष्ये अभ्युपाय एवेति। अपशब्दज्ञाननान्तरीयकं शब्द-ज्ञानमिति शब्दज्ञानेन फले जननीये सहकारितैवापशब्दज्ञानस्य न पृथक् फलतेतिभावः॥ **अपशब्दज्ञानम**पशब्दत्वेन तज्ज्ञा-नम्। एवं **शब्दज्ञाने** इत्यपि। अपशब्दज्ञानत्वेन तज्ज्ञाने हि तद्भिन्नत्वेन शब्दज्ञानभवति॥ **यो ह्येति** भाष्यस्य य एवापश-ब्दान् जानाति असावेव शब्दान् जानातीति तज्ज्ञानसमानाधि-करणशब्दज्ञानादेव धर्म इति न ततो विपरीतफलकल्पना युक्तेति-भावः॥ तदाह **अपशब्दज्ञाननान्तरीयकत्वादिति**। बहु-व्रीहिः। न हि वह्न्यानयननान्तरीयकम् पाचानयनन्ततः पृथक् फलम्भवति॥

तुष्यतु दुर्ज्जन इतिन्यायेनापशब्दज्ञानस्य विपरीतत्वमाचेणा-धर्मसाधनत्वमभ्युपगम्यापि भाष्ये समाधन्तरमाह अथवा कूपेति। मृद् आर्द्रा पांसुश्शुष्का। यत्कर्मनान्तरीयककर्मजन्यो यो विपरीत-

---

१ इतिभावः॥ ख॥ २ भाष्ये शब्दश्च शब्दज्ञाने इति॥

त्वमात्रेण कल्प्योऽवैधो दोषः स तत्कर्मजन्यफलनाश्यो यथा कूपखनन-नान्तरीयकशरीरव्यापारजन्यो मृल्लेपस्तत्फलजलनाश्य इति सामान्यतो दृष्टानुमानात् तन्नाशानुमानमिति बोध्यम्॥ **उत्कृष्टधर्मेति।** धर्मस्य विधिबोध्यत्वादुत्कृष्टत्वम् अधर्मस्य तु वचनाबोध्यत्वेन विपरीतत्वमात्रेण कल्प्यस्याल्पत्वेन तत्फलधर्मनाश्यत्वम्। यागीयहिंसा-या[1]न हिंस्यादिति वचनेन दुष्टताबोधनादुष्टत्वमेवेत्यन्यत्र विस्तरः॥ **भाष्येऽन्यचानियम इति।** यज्ञे सुशब्दप्रयोगाद्धर्मोऽपशब्दप्रयोगादधर्म इति तत्रैव तयोः प्रयोगनियमः। तदतिरिक्तस्थलेतु सुशब्दापशब्दयोः प्रयोगेऽनियमः। योऽपि यज्ञे दोषः सोऽपि तदङ्गभूतसङ्कल्पोद्वादिविषय एव[2] श्रुतौ हेलयो हेलयो नश्यध्वमित्यूह एव। [3]**विदितवेदितव्या** इत्यनेन श्रवणमननिदिध्यासनसम्पदुक्ता। [4]**अधिगतयाथातथ्या** इत्यनेन साक्षात्कार उक्तः। याथातथ्यं स्वार्थेष्यञ्। वेदितव्यस्य यद् यथा तथा स्वरूपं सत्यं स्वरूपं शुद्धसच्चिदानन्दरूपन्तदधिगतमित्यत्रेण प्राप्तं यैरित्यर्थः। यज्ञे पुनरित्यनेन तत्त्वज्ञानिनामपि कर्माधिकारं सूचयति। [5]**प्रयुञ्जते इति।** वर्त्तमानसमीपे भूते लट्। एवन्नापभाषन्त इत्यपि। अत एव तन्नामानो बभूवुरित्यर्थः॥ व्याकरणपदार्थविचारस्य सङ्गतिन्दर्शयितुमाह **उक्तमिदमिति।** आदिना तस्माद्ध्येयं व्याकरणमित्यादिपुनः पुनरुक्तिर्गृह्यते॥

---

१ यागीयहिंसा न हिंस्यात्॥ ख॥ २ श्रुतौ हेलयो नश्यध्वम्॥ क॥
३ विदितवेदितव्या इति भाष्यम्॥
४ अधिगतयाथातथ्या इति भाष्यम्॥ ५ प्रयुञ्जते इति भाष्यम्॥

ननु सूत्रसमुदायस्य व्याकरणस्येदं सूत्रमित्युपपद्यतेऽत आह **द्वाभ्यामिति**। सूत्रपदेनाप्यष्टाध्याय्येव यदोच्यते तदापीष्यतेऽयमप्रयोगः स न सिद्ध्येदित्यर्थः॥ ननु किमुच्यते [१]**षष्ठ्यर्थोऽनुपपन्न इति**। पर्य्यायतया सह प्रयोगोऽपि न स्यादत आह **सामान्यविशेषेति**। सूत्रं सामान्यं व्याकरणं विशेषः। सूत्रशब्देनाष्टाध्याय्येव। तदेकदेशेतु योगव्यवहार एव योगे योगे उपतिष्ठते इत्यादौ॥ **यदात्विति**। **सूत्राणिचाप्यधीयान** इति भाष्ये वक्ष्यमाणत्वादितिभावः। वस्तुत एकदेशस्य सूत्रत्वेऽपि तस्यापि साक्षात्परम्परया वा व्याकरणत्वात् षष्ठ्यर्थानुपपत्तिरेवेतितत्त्वम्॥ [२]समुदायस्यातिरिक्तत्वेऽपि दोषमाह भाष्ये **शब्दाप्रतिपत्तिरिति**। **व्याकरणाच्छब्दान्प्रतिपद्यामहे इति** शब्दविषयव्यवहारासिद्धिः प्राप्नोतीत्यर्थः। यतः केवलसूत्रेभ्यश्शब्दप्रतिपत्तिर्न दृश्यते। व्याकरणस्य [३]शब्दप्रतिपत्तिहेतुत्वञ्च लोकसिद्धम्। व्याकरणाच्छब्दान्प्रतिपद्यामहे इति व्यवहारात्। सेयमप्रतिपत्तिसाधनता सूत्राद्व्यावर्त्तमाना तद्व्याप्यां व्याकरणशब्दवाच्यतां व्यावर्त्तयतीतिभावः॥ तदाह **न हीति**॥ भाष्ये **चर्चापदानि** चर्च्यमानानि विभज्यमानानीत्यर्थः॥ **शब्द इति**। लक्ष्यमित्यर्थः। अत्र पक्षे षष्ठ्यर्थ उपपद्यते शब्दाप्रतिपत्तिहेतुता तु तदवस्था॥

---

१ षष्ठ्यर्थोऽनुपपन्न इति भाष्यम्॥ २ सूत्रशब्देनाष्टाध्याय्येव तदेकदेशेतु योगव्यवहारासिद्धिः॥ ख॥ समुदायस्येत्यारभ्य सिद्धिरित्यन्तं नास्ति॥ ख॥ ३ शब्दप्रतिपत्तित्वञ्च॥ क॥

वाक्याध्याहार इति। वाक्यघटकपदानां सूत्रान्तरे श्रुतानां स्वरितत्वप्रतिज्ञयाध्याहारः कल्पनमित्यर्थः। यद्वा वाक्याध्याहार इत्यनेन वार्त्तिकस्थवाक्यानां सूत्रतात्पर्यविषयता वाक्यैकदेशन्यायेन सूचिता॥ ननु राजभोजना इतिवत्कर्मण्युटि न दोषोऽत आह **करणे इति।** कर्मणि स तु क्वाचित्क इतिभावः॥ **लक्षणप्रपञ्चाभ्यामिति।** यथा कर्मधारयप्रकरणे अलुक् प्रकरणेच। विजिगीषुकथायां हि अभिहिताभिधानमशक्तिसूचकत्वाद्दोषाय दृहतु व्युत्पादनार्थत्वान्न दोषकृदितिभावः। पूर्वं सामान्ये उक्ते पश्चादिशेषकथनमप्रपञ्चार्थमिति युज्यते। अत्रतु विपरीतमिति न तत्साम्यमित्यन्ये॥

प्रतीयन्त इति। एवञ्च विपरीतव्यावृत्तिः सदृशसङ्ग्रहश्च व्याकृतिरितिभावः। एतेन शब्दाप्रतिपत्तिरप्यत्र पक्षे उद्भूता व्यावर्त्यव्यावर्त्तकरूपलक्ष्यलक्षणस्थातिप्रसक्तत्वात्पृच्छतिभाष्ये **किम्पुनरिति। जनपदान्तरेति** भावप्रधानो निर्देशः॥ **यद्देति।** मात्रा परिच्छिन्नोऽशः। औषधसंस्कृते तत्र समुदाये घृतादिशब्दस्य रूढिरितिभावः॥ **अशुक्लोऽप्यवयवे इति।** प्रयोग इत्यनेनान्वेति॥ **आरोपादिति।** समुदायस्य शुक्लत्वे अशुक्लावयवे प्रयोगे च हेतुः। तत्र समुदाये शुक्लत्वारोपे हेतुरवयवान्तरस्य शौक्ल्यादिति। वनैकदेशे पुष्पिते पुष्पितं वनमितिवदेकदेशेऽपि शुक्ले शुक्लः पट इतिव्यवहार इति बोध्यम्॥ **शब्दार्थभेदादिति।** अनेकावस्थायुक्तं शिरो राङ्शब्दार्थः। यत्किञ्चिदेकावस्थायुक्तं शिरश्शब्दार्थः। तादृशराङ्शब्दार्थस्य तादृशशिरः पदार्थोऽवयव इति

षष्ठ्यर्थोपपत्तिरितिभावः। **सूत्रशब्देन तु समुदायरूपतेति।** अनेकावस्थायुक्तस्य तस्य व्याकृतिक्रियाकरणावस्थाविशिष्टमवयव इति तद्रूपावयवस्थायं समुदाय इत्यर्थः। ईदृशे स्थले विकल्पात्मकज्ञानं वस्तुशून्यमेव। व्यपदेशिवद्भावविषयेऽप्येवमेव। "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति योगसूत्रे पतञ्जल्युक्तेरित्यन्ये॥ **भाष्येऽविजानत इति।** मन्दबुद्धेरित्यर्थः॥ [1]**सूचत एवेति।** एतन्मूलकमेव पठ्यते **सूत्रेष्वेव हितत्सर्वं यद्वृत्तौ यच्च वार्त्तिके इति॥** ननु लोकप्रसिद्धमातृकापाटनेव वर्णज्ञानसम्भवान्माहेश्वरो वर्णसमाम्नायः किमर्थ इति पृच्छति भाष्ये **किमर्थ इति।** पाणिनये महादेवकृत इत्यर्थः॥ ननु साधुत्वान्वाख्यानस्फलमत आह **नहीति।** उत्तरं **वृत्तिसमवायार्थ** इति। वृत्तिश्शास्त्रप्रवृत्तिस्तदुपयोगिसमवायो वर्णगतः क्रमविशेषः स बोध्यत्वेनार्थः प्रयोजनं यस्य तथोक्तः। सति ह्यचरसमाम्नायेऽजादिसञ्ज्ञाभिर्लाघवेन शास्त्रप्रवृत्तिरिग्यण इत्यादौ यथासङ्ख्यप्रवृत्तिश्चेतिभावः। अनेनास्य शास्त्रबहिर्भूतत्वं सूचितम्। अत एव मङ्गलार्थमहतश्शास्त्रौघस्यादितो वृद्धिशब्दं पठतीति वक्ष्यति। अन्यकर्तृकत्वञ्च सूचितम्। पाणिनिशास्त्रप्रवृत्त्यर्थं उपदेश इत्युक्ते उपदेशे गुरुकर्तृतायास्स्वरसतः प्रतीतेः भिद्बोच्चारणेऽपि मन्त्रोपदेश इत्यादावुपदेशव्यवहारात्। अनुबन्धकरणार्थ इत्यत्र करणपदेनेतरस्य

---

१ सूत्र एवेति॥ ख॥

सिद्धत्वसूचनात्। तत्करणञ्चोपदेशकर्तृकर्तृकमेव प्रत्यासत्तेरित्याहुः॥ **भाष्ये किमिदमिति।** कोऽयं समास इति प्रश्नः। **धर्मनियमवदिति** षष्ठीसमासः। पञ्चत्रयभेदमुपपादयति[1]। **आद्यतात्पर्यन्तूक्तं लाघवेन शास्त्रप्रवृत्त्यर्थ इति॥** ननु नेदमाद्योच्चारणमस्यानादित्वात् तत्कथमुपदेशत्वव्यवहारोऽत आह भाष्ये **उच्चारणमिति।** ढक्कानिनादेनाभिव्यक्तिरित्यर्थः॥ फलान्तरमाह [2]**अनुबन्धकरणार्थश्चेति।** अनुबन्धबोधनार्थ इत्यर्थः। चेनाकारस्य विवृतगुणत्वसङ्ग्रहः। उपलक्षणत्वेन वा। अनुबन्धत्वञ्च समुदायान्यत्वे सति नान्यर्थेति तात्पर्यम्॥ ननु प्रत्याहारशब्देन सूत्रस्थेत्तादर्थ्यमनुबन्धानामनुपपन्नमत आह **प्रत्याहारशब्देनेति।** अधिकरणव्युत्पत्त्या अर्ग आद्यचा वेतिभावः॥ **भाष्ये वृत्त्यर्थ इति।** लाघवेन शास्त्रप्रवृत्त्यर्थ इत्यर्थः। एतेन प्रत्याहारद्वारा समवायस्य वृत्त्यर्थता दर्शिता॥ [3]**भोत्स्यामह इति।** अन्तर्भावितण्यर्थो बोधयिष्यामह इत्यर्थः। एवं विज्ञातुमित्यस्य ज्ञापयितुमित्यर्थः॥ **सति ह्युपदेशे इति।** एवञ्च व्याकरणाध्येतृणामचरसमाम्नायेनैवावश्यकेनेष्टवर्णज्ञाने सिद्धे न तदर्थमाष्टका पाठनीयेतिभावः॥

एकश्रुत्येति। वैखर्य्येण पाठेतु द्वयोरेव कर्त्तव्यतां वदेदित्यर्थः। तेषां लोकतः सिद्धौतु दोषरहितानामपि तत एव सिद्धेरुपदेशवैयर्थ्यापत्तिरितिभावः। वैखर्य्येण पाठेऽप्यन्यतमपाठेऽन्यस्य

---

१ शास्त्रेति इत्यधिकम्॥ क॥ ख॥ २ अनुबन्धकरणार्थश्चेति भाष्यम्॥
३ भोत्स्यामह इति भाष्यम्॥

कर्त्तव्यत्वाभिप्रायेण सर्वेषाङ्ग्रहणमित्यन्ये। आकृत्युपदेशे किमित्यकारादिह्रस्वव्यक्तिविशेषोपादानम्। तदुपादाने व्युत्पत्त्यन्तरग्रहणानापत्तिश्चेत्यत आह **उपात्त इति**। नान्तरीयकत्वञ्च तं विना जातेरुच्चारयितुमशक्यत्वात्॥

संवृतादीनामिति। भाष्ये तादृग्दोषसहितानामाकृतिग्रहणात्प्राप्तस्य ग्रहणस्य प्रतिषेधो वक्तव्य इत्यर्थः। तदाह **एकारादीनां संवृतत्वमिति॥ अवशिष्ट इति**। संश्लिष्टः सन्दिग्ध इति यावत्॥ **ह्रस्व इवेति**। तदुत्कालसङ्कोचेनोच्चारित इत्यर्थः॥ **निष्ठुर इति**। त्वरित इत्यन्ये॥ **गोचाणीति**। स्वरदोषजातथ इत्यर्थः॥ **भाष्ये गर्गादिविदादिपाठादिति**। संवृतादिदोषरहितानामेव तत्र पाठादितिभावः॥ **साधुत्वमिति**। निवृत्तकलादिदोषवत्त्वमित्यर्थः॥ **गार्ग्य इत्यादीनामिति**। तत्रत्यानाङ्कलादिदोषनिवृत्तिर्न स्यादित्यर्थः। तदाह **ततश्चेति**। परेतु समुदायानामेतत्प्रकृतिकयञन्तसमुदायानां साधुत्वं यथा स्यादित्यर्थस्याठश्चरितार्थो न कलादिदोषनिवर्त्तयेदित्येव भाष्यार्थः। पाठश्चैव विशेष्यत इत्यग्रिमभाष्यस्वरसादित्याहुः॥

निर्दर्शनार्थत्वादिति। तत्रावर्णस्य अ अ इति कृतैव तदुत्तदनन्तरमन्येषामपि करिष्यामीतिभावः। एतेनावर्णप्रतिपत्तेः कृतत्वाद्वृद्ध्यामीत्यनुपपन्नमित्यपास्तम्॥ **भाष्ये सा तर्हि वक्तव्येति**। तथाच प्रत्यापत्त्याश्रयणे गौरवमितिभावः॥ [1]**लिङ्गार्थात्विति**। अनुबन्धस्थानीयतत्तद्वृत्त्यादिगतकलादिलिङ्गनिवृत्त्ये-

१ लिङ्गार्थात्विति भाष्यम्॥

त्यर्थः। नाकृतिनिर्देशप्रयुक्तदोषपरिहारमात्रप्रयोजना प्रत्यापत्तिः किन्तु सर्वानुबन्धेत्सङ्ज्ञाशास्त्राद्यकरणफलिकापीति न गौरवमिति भावः। तदेव विवृणोति [1]**तत्तर्हीत्यादिना**। धात्वादिगतकलादिलिङ्गमित्यर्थः॥ **अथवैतर्हीत्यस्य** तथापीत्यर्थः॥ [2]**अनेकमनुबन्धशतमिति**। एकैकस्यानुबन्धस्य शतश उच्चारणान्नादृशास्त्रानेक उच्चारणीया इत्यर्थः॥

यथेति। एधस्त्यादयोऽनुदात्तङितः कलदोषयुक्ताः पाठ्याः। स्वरितञितश्च धातवः। तत्र कलादात्मनेपदम्। धातात्कर्त्रभिप्राये क्रियाफले इति सूत्रे कार्य्ये। एवं टकितौ कलधातौ पठित्वाद्यन्तौ कलधाताविति पाठ्यम्। एवं ङितोऽर्द्धकदोषयुक्तान्पठित्वा अर्द्धकात् क्ङिरिति ङितश्च ग्रस्तान्पठित्वा ग्रस्तादयुच् इत्यादिबोध्यम्। एतेच कलादयः प्रक्रियादशायामेव प्रयोगेतु शुद्ध एव शास्त्रान्ते प्रत्यापत्तिकरणात्। **आदिः कलैस्सहे**तिपाठः॥ **भाष्येऽपाणिनीयमिति**। वर्णसमाम्नायसमर्थनाय प्रवृत्तस्यैकदोषपरिहाराय सकलशास्त्रस्य व्याख्यानमापेक्षगुरुप्रकारेणान्यथाकरणे वृश्चिकभियेत्यादिन्याय आपततीतिभावः॥ नन्वपठितेषु दोषनिवृत्तिर्न स्यादत आह **यथाभूता इति**। गर्गाद्यकारादिषु एकरूपेण पठितेषु तज्जातीया एव[3] ते सर्वत्र साधव इत्यनुमातुं शक्यत इतिभावः॥ **भाष्ये पाठश्चैवेति**। विशेष्यते तत्तत्प्रत्ययवैशिष्ट्येन बोध्यत इत्यर्थः॥ [4]**द्विष्ठानीत्यस्य** द्वयोरर्थयोस्तिष्ठन्तीत्यर्थ इत्यत

---

१ तत्तर्हीतिभाष्यम्॥ २ अनेकमनुबन्धशतमिति भाष्यम्॥
३ एव साधवः॥ क॥ ४ द्विष्ठानीति भाष्यम्॥

आह **शब्दस्यापीति**। तत्र कः कीदृशो धावतीतिप्रश्ने श्वेत इत्युत्तरम्। श्वा इत इतिच्छेदेन क इत्यस्योत्तरम्। श्वेत इति च्छेदेन कीदृश इत्यस्योत्तरमिदम्। एवङ्क्षेपाञ्जनपदानाङ्क्ता को वा समर्थ इति प्रश्न उत्तरम्। **अलमित्यादि**। अलम्बुसा देशविशेषाः। बुसानां पलालवर्णानां यावता प्राप्तिमान् अलं समर्थ इतिचार्थः॥ पातेति क्वचित्पाठः। पा रक्षणे इत्यस्य रूपम्॥ **केवलानामिति**। एवञ्च कलादिदोषाणां न कुत्रापि प्रसक्तिरितिभावः॥ **भाष्ये यानि तर्ह्यग्रहणानीति**। कार्यविधावकृतानुवादानीत्यर्थः॥ [१]**उपदेश इति**। ङ्याप्प्रातिपदिकादित्यादावनुवादरूपेण ग्रहणमित्यर्थः॥ तेनोद्देशस्य प्रातिपदिकानाम्नोपदेश इत्यादेच इतिसूत्रस्थभाष्यविरोध इत्यपास्तम्॥ नन्वेवमतिप्रसङ्गस्स्यादत आह **शिष्टेति**। एवं संहितादीनामतिषेध इत्यस्मिन्प्रत्याख्याते इष्टबुद्ध्यर्थ इत्यपि प्रत्याख्यातप्रायमेवेत्यलम्॥

इति शिवभट्टसुतसतीगर्भसम्भवनागोजीभट्टकृते भाष्यप्रदीपोद्योते प्रथमस्य प्रथमपादे प्रथमाह्निकम्॥

---

१ उपदेश इति भाष्यम्॥

महाभाष्यप्रदीपोद्योतः ।

पाणिनिकात्यायनपतञ्जलिभ्यो नमः ।

अइउण्।१॥ ननु चतुर्दशसूत्र्याः प्रयोजनमुक्तमेव तत्किं पुनरत्र तद्ग्रहणेनेत्याशङ्क्याह **सर्वेति । विशेषेण ।** [1]तद्रूपेण। प्रत्येकं वर्णेभ्यो विभक्तिमाशंक्याह **स्वरूपेणेति ।** शब्दजन्यज्ञानविषयोहि-शब्दस्यार्थः । एवं च स्वरूपमपि स्वजन्यबोधविषयत्वेनार्थः ॥ **अनु-कार्यमर्थ इति तु स्पष्टमेव ।** एवं विद्यमानस्याप्यर्थवत्त्वस्याविवक्षित-त्वादर्थवत्सूत्रेऽग्रहणादित्यर्थः । स्वरूपस्य श्रोत्रगृहीतस्यैव शाब्दे भानोपपत्तौ न तत्र शक्तिः कल्प्या । अनुकार्यं च सादृश्येनोपस्था-पयतीति न तत्रापि वृत्तिः । वृत्त्यार्थबोधकत्वं चार्थवत्त्वमर्थवत्सूत्रे निविष्टमितिभावः । अनुकरणत्वभङ्गान्नविभक्तिरिति तत्त्वम् । सौ-चत्वाद्वा । कारप्रत्ययोऽपि वाऽऽख्यकान्न ॥ **स्वरसन्धिरस्तिति ।** सौचत्वात्संहितायाः अविवक्षणादेतिभावः । अजादिसंज्ञानामनिष्पा-दादिति तु चिन्त्यम्। वर्णोपदेशे इत्संज्ञायामचप्रत्याहारे च निष्पन्ने प्रवर्त्तमानानां यणादीनां सुध्युपास्य इत्यादौ तटस्थ इवोद्देश्यतावच्छे-दकाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेर्दुर्वारत्वात्। अन्यथा **तुल्यास्य-प्रयत्नमित्यादौ** सवर्णदीर्घादि न स्यात्। अत्र सूत्रे तत्रेति[2] पाठे-

---

१ तत्तद्रूपेण ॥ क ॥ २ तत्रेति पाठेऽप्ययमेवार्थः ॥ क ॥

ऽप्येवमेवार्थः । वाक्यापरिसमाप्तिन्यायेनेह ग्रहणकशास्त्राप्रवृत्तेः सावर्ण्येऽपि नाच तद्ग्रहणमिति व्यर्थोविवृतोपदेशोऽत आह **प्रदेशेष्विति । अकः सवर्णे** इत्यादौ । तत्राप्यकारः संवृत एवेतिभावः ॥

ननु विवृतपदस्य गुणिपरत्वे सविशेषणत्वात्समासो न स्यादत आह **विवृतस्य गुणस्येति । भाष्येकर्त्तव्य** इत्यस्य प्रतिज्ञेय इत्यर्थः । एतेन तस्योच्चारयितुमशक्यत्वमित्यपास्तम् । भाष्ये **किं प्रयोजनमि**त्यत्र उद्दिश्येत्यध्याहारः । कर्त्तव्य इत्यनुषङ्गश्च ॥ नन्वाकारग्रहणं सवर्णग्रहणमेवेति भेदाभावात्कथं तस्य करणत्वमत आह **येन शास्त्रेणेति** । नन्वाकृतिभेदात्कथं तत्पचेऽप्यकारेणाऽऽकारग्रहणमत आह **आकारस्यापीति** । केवलकण्ठ्यत्वे सति स्वरत्वमत्वजातिव्यञ्जकमिति दीर्घप्लुतयोरपि सेतिभावः । प्रातिपदिकार्थमात्रे प्रथमायां यथाश्रुतेऽन्वयो न जायतेऽत आह **अच चेति** । उत्तरेऽपि तर्हि प्रथमाकुतोनेत्यत आह **प्रयोगाभावादिति** । निमित्तादिशब्दप्रयोगाभावेऽपि तदर्थे गम्यमाने स्यादेवविभक्तिरत आह **प्रायग्रहणादिति । विभाषागुणे इति** । निमित्तेत्यादिवार्त्तिके सर्वासामित्येतच्च पंचमी ह्यतीयाविधायकं किन्तु हेताविति विभाषागुणेति[1] सिद्धयोस्तयोरन्याभिरबाधायानुवादकमेवेतिभावः ॥ **विवारयतीति** । सचाभ्यन्तरप्रयत्नः ॥ **दोषापत्तिरिति** । दण्डाढकमित्यादौ दीर्घानापत्तिर्दोष इत्यर्थः ॥ ननु प्रयत्नभेदेऽपि जातिसद्भावात्यादेवग्रहणमत उक्तं **व्यक्तिपक्षे इति** । ननु कालस्य

---

१ गुणेति द्वयोः ॥ क ॥

व्यापकत्वाद्वाह्यत्वेन समाधानमयुक्तं किंच कालो न प्रयत्न इति तद्भेदे कथं सवर्णत्वाप्राप्तिरत आह **प्रयत्नाभीति**। वाह्यत्वं व्युत्पादयति **प्रसिद्धेति**। प्रसिद्धपरिमाणं यद्द्रव्यन्तरगतपरिच्छेदक्रियान्तरं परिच्छेद्यक्रियापेक्षयान्यत् तदपेक्षणादित्यर्थः। एवं च वाह्यपरिच्छेदक्रियापेक्षया वाह्यत्वोक्तिरितिभावः॥ क्रियैव कालो नातिरिक्त इति मते इदम्। अतिरिक्तः क्षणसमूहः काल इतिमते परिहरति। **अथवेति**। अयत्नभावः। नाभिप्रदेशावच्छिन्न[1]यत्नेन प्रेरितो वायुस्तत्तत्स्थानाभिघातोत्तरं वर्णाभिव्यञ्जक इति शिक्षादौ स्पष्टम्। वायोरल्पत्वाधिक्यानि च[2] ह्रस्वत्वदीर्घत्वादिरूपकालव्यञ्जकानीति॥ ननु ह्रस्वदीर्घयोः कालभेदादतो भिस[3] इत्यादौ दीर्घाग्रहणवद्विलम्बितवृत्त्योच्चारितस्य ह्रस्वाकारस्यापि द्रुतमध्यापेक्षया कालाधिक्याद् ऐस्भावविधायके ग्रहणानापत्तिरत आह **द्रुतादीति**॥ उपदिश्यमानस्येत्यत्रवार्त्तिककृतः कर्त्तृत्वे[4] पक्षयोर्भेदो न स्यादत आह **किं सूचकारेणेति**। सूचकारो महेश्वरः। वेदपुरुषो वा। येनाक्षरसमाम्नायमित्याद्यैनिह्यादित्याहुः॥ ननु प्रत्यक्षतोऽकारे श्रुते तद्गतगुणस्यापि ज्ञातत्वात्प्रोऽयमसंगतोऽत आह **दुरवधारत्वादिति**। विवृतत्वादीनां श्रोत्रेन्द्रियग्राह्यत्वाभावादिति भावः। **अन्यथा**। संवृतत्वे। स्वरूपप्रच्यवे हि पुनः संवृतवि-

---

१ प्रयत्नेन ॥ क ॥

२ ह्रस्वदीर्घत्वादि ॥ क ॥

३ भिस ऐस् इत्यादौ ॥ क ॥

४ कर्त्तृत्वेन पक्षयोः ॥ क ॥

धानं युक्तं स्यादिति भावः॥ **प्रयोग एवेति।** अतिखट्वं इत्यादि प्रयोगे ह्रस्वेनान्तरतम्याद्विवृतोऽकारः प्राप्तः संवृत एव भवत्वित्यर्थम्प्रत्यापत्तिवच्च इति [१]भावः। **नन्विति।** अचश्चेत्युकारेच एव ह्रस्वत्वेन भाव्यमितिभावः। गोस्त्रियोरित्यत्रैतद्वारणार्थमेवोपस्थितिः स्यादिति तात्पर्यम्॥ **उदीचामात इति।** न चापोऽन्यतरस्यामिति ह्रस्वे चरितार्थमिदम्। न चाचाच्परिभाषोपतिष्ठते फलाभावादिति वाच्यम्। शास्त्रस्याल्पविषयतापत्तेः। गोशब्दसाहचर्येण स्त्र्यंशेऽपचश्चेत्यस्याप्रवृत्तेश्च। तदंशे हि फलाभावान्न प्रवर्त्तत इति दिक्॥ नन्वाद्यपक्षे प्रयोजनान्वाख्यानन्नाचपरत्वं द्वितीये विवृतोपदेशपरत्वमपीति विशेषस्य सत्त्वादत आह **विवृतोपदेश इत्यत्रेति। आहोपुरुषिकेत्यत्र**बुद्ध्याः प्राग्मयूरव्यंसकादित्वात्समासः॥ **अहो इति।** अहमित्यर्थे। तत्र प्रयोजनान्वाख्यानमित्येव ज्यायः प्रत्यापत्तेः। अकर्तृके आज्ञापादनाभावाच्चेत्याहुः। प्रत्यापत्त्या अइउणित्यत्रैव प्रक्रियादशायां सर्वत्राकारोविवृतः प्रतिज्ञात इत्यजानन् शङ्कते भाष्ये **तस्य विवृतोपदेशादिति।** तस्येत्यस्य वर्णसमाम्नायस्येत्यर्थः॥ **संवृतस्येति।** धात्वादिस्थस्येत्यर्थः॥ ननु अइउणित्यादौ कस्यानुकरणमित्यत्र विनिगमकाभावादाह **स्वरूपपदेति।** स्वरूपपदार्थकत्वं यथा तथोक्तं भाष्ये **विवारभेदादिति।** प्रयत्नभेदादित्यर्थः। ग्राहकस्य विवृतत्वाद् ग्राह्यस्य संवृतत्वादिति भावः॥ **प्रत्याहारे इति।** संग्राहके शास्त्र इत्यर्थः॥ **वक्तव्यमिति।** एवं च प्रयत्नभेदेनाप्यवर्णस्यापि अत्वजात्याक्रान्तस्य विवृतेनाकारेण

---

१ प्रतिपत्तिवचनमिति भावः॥ ख॥

ग्रहणं ज्ञाप्यत इत्यर्थः ॥ **यद्यप्येकोऽपीति**। प्रत्युच्चारणं वर्णान्यत्वात्। आचरसमाम्नायिकस्य प्रयोगेऽभावादिति भावः। आदिरन्त्येनेत्यस्य चान्यसदृशेन सहोच्चार्यमाण आदिसदृश इत्यार्थः। तच्च ककारादिचिक्केनागादिशब्दस्थत्वसदृशत्वाद्विवृत एव। सादृश्यञ्च व्यक्तिभेदे सति[1] सर्वधर्मसाम्यप्रयुक्तं ग्राह्यं तस्य च प्रयोगस्थेऽभावेऽप्यनेन तद्ग्रहणं ज्ञाप्यत इति तात्पर्यम्। केचित्तु देवदत्त अत्रास्तीत्यादौ प्रत्याहारलिङ्गेनैक आचरसमाम्नायिकोऽस्ति तदर्थं भाष्ये **द्वयोरित्युक्तमित्याहुः**। भाष्ये **युगपत्समवस्थानमित्यस्य** प्रयोगे इत्यादिः ॥ [2]**एवमर्थ इति**। वृत्तावेवं शब्दः प्रकारवति वर्तते इति बहुव्रीहिः। **प्रातिपदिकानीति**। धातुप्रत्ययथोरप्युपलक्षणं बोध्यम्। सर्वाण्यग्रहणानि प्रातिपदिकादीनि विवृताकारयुक्तानि पठनीयानीत्यर्थः ॥ **तद्गुरु भवति तस्मादिति**। यतः सर्वोच्चारणं गुरु अतो धात्वादिस्थ इति वाच्यमित्यर्थः ॥ ननु धातूनां बहुधा पाठाद् धात्वादीत्ययुक्तमत आह **अग्रहणेति** ॥ प्रातिपदिकेत्युपलक्षणम्। **धात्वादिस्थस्यापीति**। पठितधात्वादिस्थस्यापीत्यर्थः। एतेनाग्रहणधात्वादीत्येव वक्तुमुचितमित्यपास्तम्। **संवृतस्यैवेति**। एवं धात्वादिस्थस्य विवृतवत्कार्यं लभत इत्यतिदेशोऽयमिति भावः ॥ **अन्यथेति**। गुणोच्चारणाद्दोषोच्चारणे यत्नाधिक्यमिति भावः ॥ ननु संवृतयोस्तयोरभावेऽपि संवृतस्य विवृतौ न स्यातामेव। आन्तरतम्याभावात्। न चेकोयणिव एच इगिवानन्तरतमावपि भविष्यतः

---

१ सर्वधर्मसाम्ययुक्तम् ॥ क ॥ २ एवञ्च ॥ क ॥

सामर्थ्येन तत्र तथाङ्गीकारेऽपि खट्वाढकमित्यादौ चरितार्थस्याकः सवर्णइत्यादेर्विषये तथा कल्पने मानाभावादत आह **असत्यधीति॥ सावर्ण्ये इति।** आन्तरतम्ये इत्यर्थः। **एवञ्चातो दीर्घ इति। अतो रोरि**त्यचामुतादित्यतो विशेषणञ्च सामान्यापेक्षं ज्ञापकमिति भावः। संवृतदीर्घादिवदनुनासिकयवलानामपि वेदलोकयोरभेदं मन्यमान आह भाष्ये **स्यानौ प्रकल्पयेदित्यादि॥** तद्वद्विवृतौ दीर्घप्लुतावपि कुतो न सन्तावित्यत आह **अशक्यत्वादिति।** केचित्तु शिष्टसम्मतत्वात् ते सन्तः। इमौ तु न तथेति भाव इत्याहुः॥ **सन्ति हि यण इति।** भाष्ये **यण** इति बाहुल्याभिप्रायेण रेफस्यानुनासिकत्वाभावादिति बोध्यम्। नन्वीकारोकारयोः कथं संवृतत्वमत आह **व्रतः संवृता इति।** [१]इउऋत इत्यर्थः। क्वचित्तु व्रत इति पाठः। इकारोकाराऽकारा इत्यर्थः॥ एवञ्चाद्यप्रयोजनार्थमेव सर्वेषामकारस्य विवृतत्वं प्रतिज्ञेयमिति स्थिते शङ्कते भाष्ये **तत्रानुवृत्तौति।** एतद्विशेषणोपादानस्य फलमाह **अकः सवर्ण इति॥ अनण्त्वादिति।** अक्षरसमाम्नाये ऽपठितत्वादाकारस्येवानण्त्वमित्यर्थः। प्रत्युच्चारणं[२] भेदेऽपि अक इत्यादौ ककारेण चिह्नेनैतदनुकरणत्वानुमानमिति भावः॥ **तदनुगत इति।** साक्षात्सङ्केत्य[३]संस्कारकबोधजनक इत्यर्थः॥ ननूदात्तादिविरुद्धधर्माध्यासाद्भेदः स्यादत आह **उदात्तादीति॥ प्रतिबिम्बप्रतिभासभेदवदिति।**

---

१ इउ ॥ इ ॥ २ प्रत्युच्चारणं वर्णभेदेऽपि ॥ क ॥ ३ संस्कारबोधजनकः ॥ क ॥

[१]भिन्नभिन्नाकार प्रतिबिम्बप्रतिभासवदित्यर्थः॥ **इकारादीनामपीति।** सर्वध्वनिभिरेकस्य स्फोटस्यैव तत्तद्रूपेणाभिव्यञ्जनात्। तत्तद्रूपाभिव्यक्तिकृतश्च [२]परस्परं भेदव्यवहारोऽपीति भावः॥ **भाष्येऽनुबन्धसङ्कर** इत्यस्यानुबन्धकार्यसङ्कर इत्यर्थः॥ **ङीवादिति।** टिड्ढेत्यादिना। आदिना णित्वप्रयुक्तयुक्। पर्यायेण कित्त्वणित्वप्रयुक्तकार्ययोरप्यविरोध इति भावः॥ **भाष्येऽनुपपत्तिरिति।** [३]इष्टव्यवस्थाया इति भावः। अव्याप्त्यतिव्याप्त्योः प्रसङ्गादिति तात्पर्यम्॥ **प्रतिषेधादिति।** सावेकाच इति प्राप्तस्येत्यर्थः॥ **ठंस्त्विति। नौद्यचष्ठन्निति** विहितः॥ **करणत्वेनेति।** अधिकरणस्य करणत्वविवक्षयेत्यर्थः॥ **सामान्यरूपतयेति।** विषयत्वरूपेणेत्यर्थः॥ **भाष्यकारस्त्विति।** एकविषये नानालिङ्गकरणादर्शनाद्विषयभेदेन तदित्यत्र तात्पर्यम्। गुणा उदात्तादय इति भ्रमं व्यावर्त्तयति **गुणा अनुबन्धा इति।** तेषां गुणत्वमुपपादयति **कार्यायेति।** व्याप्रियते विषयत्वेन गृह्णातीत्यर्थः॥ **एककर्तृकत्वादिति।** स्वादित्यनेनेत्संज्ञारूपैककर्तृकत्वादित्यर्थः॥ नानेति स्थिते कथमन्यथा व्याख्यानमत आह **नानाशब्दमिति॥ नियमादिति।** ज्ञापकत्वे हि विध्यर्थत्वमिति भावः। अत्र वाक्यत्रयेऽपि तु शब्दः पूर्वपक्षव्यावृत्तौ॥ **यथा लोके इति।** [४]प्रभाज्ञया गूढचरादिरितिशेषः। एवञ्च लोकव्यवहारदृष्टान्तेनैवासङ्करः सिद्ध इत्यर्थः॥ **यत्र।** देशे काले वा॥ **तद्गुण एवेति।**

---

१ भिन्नाकारप्रतिबिम्बप्रतिभासवत्॥ क॥ २ परस्परभेदव्यवहारः॥ क॥
३ इष्टव्यवस्थाया इति भावः॥ क॥ ४ प्रभाज्ञया गूढचारादिरिति शेषः॥ क ङ॥

भाष्येऽपि **तल्लिङ्गस्तावेति** सावधारणं व्याख्येयमिति भावः॥ **यथा विकृति याग इति** । तच्च हि प्राप्तसामिधेन्यनुवादेन सप्तदशत्वं विहितम्। तच्च त्रिः प्रथमामित्यादिवाक्यबोधितया प्रथमोत्तमयोस्त्रिरावृत्त्यैवेति भावः॥ **त्रिरावृत्त्येति** । आवृत्तिः पुनरुच्चारणम्। तज्जन्यसंख्यया [१]द्वादशत्ववदत्रानेकाक्त्वमिति भावः॥ भाष्ये **आवृत्तेः संख्यानात्** । गणनादित्यर्थः॥ [२]**भवेदावृत्तितः कार्यं परिहृतमिति** । आवृत्त्याकार्यं सिद्धुमिति कृत्वा दूषणं परिहृतं [३]भवेदित्यन्वयः॥ **लिङ्गादिति** । अनेन लिङ्गेन श्रुतिस्मृतिसिद्धत्वादस्य व्यवहारस्य गौणत्वमेव नेति ज्ञाप्यते इति भावः॥ **मुख्यमिति** । आवृत्तिकृतबहुत्वेन स्वगतैकाक्त्वस्य बाधायोग इति भावः॥ ननु स्वस्य प्रतिगृहीतत्वासम्भवादिकन्यूनता नच पुनर्दानं दत्तस्यान्यस्वत्वाक्रान्ततया पुनर्दानासम्भवादत आह **वित्तेनेति**॥ ननु षष्ठीसमासे सहस्रसंख्याया विशेष्यत्वात्कथं दानेन सम्बन्धः। कथं वा सम्पन्ना इति बहुवचनान्तेन सामानाधिकरण्यमत आह [४]**ऋषयः सहस्रम् इति**। अत एव सर्वे ते इत्यनेन सामानाधिकरण्यम्। परनिपातो भाष्यप्रामाण्यात्। एकैकश्च इत्यत्र उभयोरपि द्योतकत्वेन द्योतक[५]समुच्चयस्य च बहुत्वे दृष्टत्वेन द्विवचनश्रवणयोर्यौगपद्यम्। [६]यथाजातीयको गार्ग्यायणीत्यादौ तच्च यथाशब्दत्वे समुच्चित्य [७]द्योतकता अभावे गार्गीति ङीपैव

---

१ सप्तदशत्ववत् ॥ क ॥ २ भाष्ये – ॥ ३ भवेदित्यर्थः ॥ क ॥
४ सहस्रं ऋषयः ॥ ङ ॥ ५ समुच्चयस्य बहुत्वः ॥ क ॥
६ यथायथा ॥ वा ॥ ७ समुच्चित्यद्योतकता ॥ क ॥

तथा प्रकृतेऽपि ग्रसो वैकल्पिकत्वात्पक्षे एकैकमित्यपि। द्व्यादिशब्दविषये तु न [१]समुच्चित्योतकता। अनभिधानात्। एकशब्दे तु मुखचित्य प्रत्येकञ्च द्योतकता। अभिधानस्वभावात्। यत्र तद्धितेनानुक्ता वीप्सा तत्र द्विर्वचनं भवत्येव यथैकैकशो देहीति। [२]भाष्यस्यायमाशयः। यत्र तद्धितमात्रेण लोके वीप्सानभिधानं तत्र द्विर्वचनमपि। यत्र मासशः इत्यादौ तावतैव वीप्साभिधानं तत्र न कदापि तयोः समुच्चय इति दिक्॥ **सामर्थ्यलक्षण इति।** सामर्थ्यकृतो गुणभूतैर्ऋषिभिः सम्बन्ध इत्यर्थः॥ **सर्वे ते इत्यत्र** तच्छब्देन गुणभूतस्यापि परामर्शोऽत्र पक्षे बोध्यः। अत एव दत्तेति [३]समानकर्तृकत्वम्॥ **सहस्रदक्षिणा इति।** सहस्रदक्षिणा गोरूपा येषां दातृणान्ते इत्यर्थः। तेन गोसहस्रदानफला एव ते नत्वेकगोदानमात्रफला इति व्यवहारो यथा स्मृतौ तथा प्रकृतेऽपीति भावः॥ **भुजेर्ब्राह्मणैरिति।** [४]सङ्ख्याया भोक्तृत्वानुपपत्तेर्गुणभूतब्राह्मणैरेव भुजेः सम्बन्ध इति भावः॥ **भाष्येऽनेकाच्त्वमिति।** तन्मात्रमित्यर्थः। **एकस्यैवेति।** व्यापकस्येत्यपि बोध्यम्। अकारस्येत्यप्युपलक्षणमित्युक्तम्। भाष्ये **उच्चारणं नामेत्युत्तरमत** इति शेषः॥ **आन्यभाव्यमि**त्यस्यान्यत्वमित्यर्थो नेत्याह **अन्यस्येति॥ अथवेति।** भावशब्दः कर्तृसाधन इति भावः। एवञ्च प्रतिप्रयोगमकारस्यान्यत्वमित्यर्थः॥ **यथेति।** एवञ्चाग्र इत्यत्रकारो दण्डेत्यकाराद्भिन्नः। दण्ड अग्रमित्यादौ कालव्यवधानात्।

---

१ समुचितद्योतकता॥ क॥ २ भाष्यस्यायमाशयः॥ क॥
३ समानकर्तृके क्तेति॥ क॥ ङ॥ ४ संख्यायां भोक्तृत्वानुपपत्तेः॥ क॥

दण्ड इहेति प्रयोगे इकारवत् । तथा दण्ड [1]इत्याद्यकारोन्याकारान्नित्यः । शब्दव्यवायात् । क्षतिरित्यादौ तकारव्यवहितेकारवत् । इत्यनुमानेनैभेदे सिद्धे उदात्तादिविरुद्धधर्मप्रत्ययोऽपि पारमार्थिक एवेत्याशयेन तद्भेदादपि भेदसिद्धिरित्यभिप्रेत्याह **उदात्तादीति** ॥ **नानात्वमकारस्येति** । युक्तमिति शेषः ॥ ननु य एवोदात्तोऽकारः स एव देवदत्तेनानुदात्तः कृत इति प्रत्यभिज्ञा विरोधोऽत आह **प्रत्यभिज्ञानञ्चेति** । विभुत्वं निराचष्टे भाष्ये **युगपच्च देशेति** । अर्कादिशब्दा एव देशपदेनोच्यंते ॥ **देशपृथक्त्वेष्विति** । देशानां पृथक्त्वेषु भेदेषु सत्स्वित्यर्थः ॥

एवं वर्णानामनेकत्वे परेण साधिते वर्णैकत्ववादी एकत्वं स्थापयितुं तद्दूषणोद्धारमाह भाष्ये **यदि पुनरिति** । तत्र शकुनिवदिति दृष्टान्तस्य तद्वत्परिच्छिन्नत्वे न तात्पर्यं तन्नाते तस्य विभुत्वादिति ध्वनयन्नाह **कालशब्दाभ्यामिति** ॥ **व्यक्तिस्फोटवादिन इति** । व्यक्तेर्नित्यत्वैकत्ववादिन एकैव शब्दव्यक्तिरिति वादिन इत्यर्थः । अनेनाद्यं दूषणं परिहृतम् द्वितीयं परिहरति **यथेति** ॥ **एवमिति** । अस्यानेकदेशेषु युगपदुपलम्भो व्यञ्जकवशादिति शेषः ॥ पूर्वदृष्टस्य पश्चाद्दर्शनेऽपि अव्यवहितस्य व्यवधानेऽपि न भेद इत्येतन्नाचेण दृष्टान्त इति भावः ॥ नन्वेवं विभुत्वे नित्यत्वे च सर्वत्रदेशे सर्वदोपलम्भापत्तिरत आह **व्यञ्जकेत्यादि** ॥ **जातिस्फोटेति** । जातिरेवैका शब्दव्यक्तयस्त्वनन्ता इति वादीत्यर्थः ॥ भाष्ये **अनित्यत्वमेवं स्यादिति** । व्यक्तेरेकत्ववादी तस्या

---

१ इत्यत्राद्याकारः ॥ क ॥

नित्यत्वं मन्यते इति भावः॥ ननु विभोरेकस्यापि व्यञ्जकवशाद्-नेकत्वोपलब्धौ कथमनित्यतेत्यत आह **भवतेति**॥ भाष्येऽपि **नित्याश्च शब्दा** इत्यस्य तवेत्यादिः॥ भाष्योक्तकूटस्थत्वाभावमुपपादयति **रूपान्तरेति**। तस्माद्भिन्ना एवानित्या एवाकारा इति पाठः। नित्या एवेति पाठस्त्वयुक्तः। अनन्तवर्णवादे तदनित्यत्वस्यैवेष्टत्वादिति बोध्यम्। यद्यप्यनुदात्तत्वादीनां ध्वनिनिष्ठत्वाङ्गीकारान्नदोषस्तथापि स्फटिकस्यैवास्यापि इतरसन्निधानेन तद्रूपपरिग्रहे संसर्गानित्यताविरोधिकूटस्थत्वाभाव इति भावः॥ पुनरप्येकत्वनित्यत्वे साधयति भाष्ये **यदि पुनरित्यादिना**। एकस्यैवाकारास्यानेकदेशेषु उपलब्धिरादित्यस्येव [1]भवतीति न तावद्व्यक्तिभेदः सिध्यति। अन्यथा आदित्यस्याप्यनेकत्वापत्तिरनित्यत्वापत्तिश्च [2]तत्तद्देशसंसर्गेणाल्पप्रकाशत्वाधिकप्रकाशत्वादिगुणसंसर्गादिति भावः॥ **विषम इति**। आदित्यदृष्टान्तेनानेकदेशोपलभ्यमानाकारादिपक्षकैक्यसाधकः प्रत्यभिज्ञायमानत्वहेतुरनेकद्रष्टृकानेकदेशोपलब्धिविषयत्वरूपोपाधियुक्त इति न तेन भेदसाधकशब्दव्यवायहेतोः तत्प्रतिपक्षतायुक्तेति भावः। अकारं पुनरुपलभत इत्यस्यैको द्रष्टाऽनेकाधिकरणस्थमिति शेषः। शब्दस्याकाशरूपैकाधिकरणत्वेनानेकाधिकरणत्वमयुक्तमित्याशयेनाह भाष्ये **अकारमपि नोपलभत इति**। अकारमप्यनेकाधिकरणस्थं नोपलभत इत्यर्थः॥ **श्रोत्रोपलब्धिरिति**। श्रोत्र एवोपलब्धिर्यस्येत्यर्थः। करणक्रियान्तेन समानाधिकरणबहुव्रीहिर्वा। एतद्विशेषणफलं दर्शयति **श्रोत्रेति**॥

---

१ आदित्यस्येव सम्भवतीति॥ क॥ २ तत्तद्देशसंसर्गेण॥ क॥

ननु दिग्ग एव श्रोत्रत्वात्कथं तत्रोपलब्ध्याकाशदेशत्वसिद्धिरत आह **आकाशेति**। कर्णशष्कुल्यवच्छिन्नं नभ एव श्रोत्रम्। चक्षुरादिवच्छ्रोत्रस्यापि भूतत्वमावश्यकमिति भावः। दिशोऽनतिरिक्तमेव चाकाशमितितत्त्वम्॥ ननु तथाप्यतेजोऽंशगतघटादिरूपस्य तैजसचक्षुर्ग्राह्यत्ववदनाकाशदेशगतस्यापि शब्दस्याकाशात्मकश्रोत्रग्राह्यत्वं किन्न स्यादित्याशङ्क्य किमसम्बद्धं तद्ग्राहकं सम्बद्धं वानाद्य इत्याह **असम्बद्धेति**। अन्यथा रामेश्वरादिप्रदेशावच्छिन्नशब्दस्यापि श्रवणप्रसङ्गः। द्वितीयेऽपि किं श्रोत्रस्य विषयदेशगमनात्सम्बन्ध उतशब्दस्य श्रोत्रदेशगमनान्नोभयमपीत्याह **गमनाभावादिति॥ श्रोत्रस्य चेति**। चेन शब्दपरिग्रहः। उभयोरपि गमनाभावे हेतुर्निष्क्रियत्वम्। दूरदेशस्थशब्दाग्रहणं तु दूरत्वादेर्दोषस्य प्रतिबन्धकत्वाच्छ्रोत्रदेशेऽनभिव्यक्तेः। [२]आकाशदेशत्वे च तदेव तस्यापि व्यापकत्वेन श्रोत्रदेशेऽभिव्यक्तस्य तेन ग्रह इति भावः॥ "आहङ्कारिकाणीन्द्रियाणीति" साङ्ख्यमतेऽपि इन्द्रियाणां स्वाधिष्ठानभूतवृत्तिगुणग्राहकत्वनियमादाकाशदेशत्वं श्रोत्रोपलब्ध्या शब्दस्य सिद्धयतीति बोध्यम्॥ श्रोत्रोपलब्धिरित्येव बुद्धिर्निर्ग्राह्यत्वस्योक्तत्वात्पौनरुक्त्यमाशङ्क्याह **पूर्वपूर्वेति**। एवं [३]चाक्षु तिरोधीयमानानेकवर्णवत् घटकलशादिशब्दग्रहणसम्भवदर्शनाय तदुक्तमिति न पौनरुक्त्यम्। **प्राप्तपरिपाकेति**। तत्सहकृतेत्यर्थः। अन्त्यबुद्धिरन्त्यवर्णबुद्धिः। एवं च तादृशसंस्कारविशिष्टान्तःकरणसंयुक्तेन तादृशसंस्कारविशि-

---

१ श्रोत्रदेशेनाभिव्यक्तेः॥ क॥ २ आकाशत्वे च॥
३ एवंचाक्षु— । ङ॥

ष्टेन ओचेणान्त्यवर्णसम्बद्धेन वर्णसमुदायप्रतिबिम्बवदखण्डस्फोटरूप-पदादिप्रत्यक्षमितिभावः ॥ नन्वेवं सर्वदाशब्दोपलम्भः स्यादतो भाष्ये **प्रयोगेणाभिव्यक्तिति इति** ॥ तद्व्याचष्टे **प्रयुज्यते** इति ॥ **ध्वनिरिति** । वर्ण इत्यर्थः ॥ भाष्ये **एकश्चपुनराकाशमिति।** एवं चैकस्मिन्नाम्रफले एक एव यथा रूपरसगन्धादिस्तथा तदाश्रय-स्यैकत्वात्तद्गतशब्दोऽप्येक एव तत्रैवच तस्योपलम्भ इति भिन्नदेशो-पलम्भ एवाभिद्ध इति भावः ॥ नन्वेकत्वेऽयं पूर्वोऽयं परोऽयं देवदत्तेऽ-यं राजदत्त इति भेदप्रतिभासः कथमत आह **देशभेदेन-त्विति** । औपाधिको भेदस्तु आकाशस्येव न शब्दस्याप्येकत्वे बाधकः। एवं संसर्गानित्यतापि तस्येव नास्यापि बाधिका । तस्यापि नीलं-नभ इत्यादिसंसर्गानित्यताप्रतीतेरित्याशयः । अत्र शब्द इत्येक-वचनेन स्फोटस्यैकत्वमखण्डत्वञ्च ध्वनितम् ॥ ननु निरवयवस्य कथं प्रदेशबाहुल्यमत आह **यथेति** ॥ एवं चौपाधिकभेदेन भेदोद्-धारः सर्वत्र भेद औपाधिक एव स एव च व्यवहारोपयोगीत्याशयः। ओचसम्बन्धस्तु प्रदेशान्तरोत्पन्नशब्दस्यापि वीचीतरङ्गन्यायेन कदम्ब-मुकुलन्यायेन वा तन्त्रान्तरे व्युत्पादित एव ॥ तत्रापि पक्षेऽस्य **चावित्यादौ** दोषो नेत्याह भाष्ये **आकृतिग्रहणादिति॥ तदाह अकारजातिरिति॥ सर्वप्रदेशेष्विति**। प्रत्याहारेऽस्य **चावि-त्यादौ** च। अकारव्यक्तीनामानन्त्यमाश्रित्यवार्त्तिककृतावर्णसमाम्नाय-स्यस्य विवृतत्वेऽपि धात्वादिस्थस्यापि विवृतोपदेशोनोदितः। भाष्य-कृतातु प्रयोगस्थानां प्रत्याहारस्थैर्यग्रहणाय तत्र जातिनिर्देशे आव-श्यके जातेर्विवृतत्वप्रतिज्ञानेनैव सर्वसिद्धेः स दोषोवारितः। **अस्य**

च्वावित्यादौ तु सत्यपि विवृतत्वेऽनण्त्वात्सर्वावर्णग्रहणं न स्यादित्यपि जातिनिर्देशेनैव परिहृतम्। एवञ्चाणुदित्सुत्रेऽण्ग्रहणं न कार्यमित्याशयः॥ **तस्याश्चेति**। स्वाश्रयव्यक्तिद्वारेत्यर्थः। तच्च प्रत्यापत्तिवाक्ये तपरनिर्देशात् षण्णामेकशेषनिर्देशाद्वा ह्रस्वस्यैव संवृतत्वं बोध्यम्॥ ननु जातिनिर्देशेऽतिप्रसङ्ग इत्याह **अष्टन इति॥ अन्यथा ह्रस्वमेवेति**। नच तन्निर्देशे ऽन्तरतमपरिभाषयादीर्घो न स्यादिति दीर्घविधानं दीर्घनिर्देशे तु तत्सामर्थ्यात्तस्यापि विधानं जातिग्रहणादन्यस्यापी[1]ति वाच्यम्। दीर्घनिर्देशसामर्थ्येनान्तरतमपरिभाषाबाधकल्पनापेक्षया ह्रस्वानुपस्थितेरेवकल्पने लाघवमित्याशयात्॥ ननु दीर्घोच्चारणसामर्थ्यान्नाभूद्ह्रस्वः प्लुतस्तु स्यादत आह **प्लुतश्चेति॥ विषये** दूराद्भूतादौ। अनेनापि प्लुतविधानेऽणेऽनुवाददोषः स्यादितिभावः॥ सर्वचाकृतिर्निर्दिष्टेत्यत्र ज्ञापकमाह भाष्ये **तद्वच्चेति॥** सादृश्ये वतिभ्रमं व्यावर्त्तयति **स इति॥ अथवा वत्यन्तमेतदिति**। [2]तदित्यस्यास्य **च्वावित्यादिवदित्यर्थः॥** तदाह **तच्चन्यायेनेति**। तच्चास्य **च्वावित्यादौ**। आकृतिग्रहणप्रयुक्तातिप्रसङ्गनिवारणार्थमेव हि तच्च तपरकरणम्। जातिपक्षेऽपि विवृतत्वप्रतिज्ञाऽकः **सवर्णे** इत्यादेर्दण्डाऽऽनतिरित्यादौ दीर्घार्थमावश्यिकैव। एवं प्रत्यापत्तिवचोप्यावश्यकमेव तुल्यन्यायात्। जातिग्रहणप्रयुक्तातिप्रसङ्गनिवारणाय तपरत्ववद्विधेये **त्यदादीनाम**

---

१ अन्यस्यापि च इति वाच्यम्॥ क॥

२ तदा तद्वत्॥ क॥ ङ॥

दत्यादौ तद्वारणाया[1]प्रत्यय इत्येतदिति बोधितम्। अत्र पक्षेऽण् ग्रहणप्रत्याख्यानेऽपि ऋल्वर्णयोः सावर्ण्येन समानजातित्वातिदेशान्नदोष इति भावः॥ **अवात्तामिति**। वसेर्लुङ् तसस्तां सिच् **सः सीति** तत्वं **वदव्रजेति** वृद्धिः। **झलोझलीति** सलोपः॥ ननु वचनसामर्थ्यात् झल्सदृग्रेऽपि भविष्यतीत्यत आह **अभित्या इति**। भिदेर्लुङि सिचिरूपम्। आकृत्यनाश्रयणेत्याह भाष्ये **रूपसामान्यादिति**॥ तद्व्याचष्टे **व्यक्तीति**॥ **अभेदव्यवहार इति**। रूपसादृश्यनिबन्धनप्रत्यभिज्ञाकृताभेदव्यवहार इत्यर्थः। अल्पमहत्स्थूलकृशह्रस्वदीर्घगोघटादिषु गौर्घट इत्यादिव्यवहारवदिति भावः। एवं च व्यक्तिव्यतिरिक्तजातिस्वीकारोऽपि व्यर्थ एवेत्याशयेनाह **व्यक्तिव्यतिरिक्तान्विति॥ मा वेति**। अनुगतप्रतीतिव्यवहारयोः सादृश्येनैवोपपत्तेरितिभावः। सादृश्यञ्चात्र समानध्वनिकृतम्॥

ऋल्टक्॥ २॥ भाष्ये [2]**अथ ल्टकारेति**। यद्यप्येतच्चतुर्दशसूत्री विवृतौ नन्दीश्वरकृतकाशिकायामनेकेषाम् ऋषीणां नानाविधार्थजिज्ञासायां शिवेन सर्वजिज्ञासानिवृत्तये एषा ढक्कानिनादेन प्रकाशितेत्युक्तमितीदमनुपपन्नं तथापि पाणिन्युद्देश्यकं फलमस्ति न वेति एतत्तात्पर्यम्। अन्यवर्णचतुर्दशकन्तु पाणिन्युद्देश्येनैवोपदिष्टमित्यपि तत्रैव स्पष्टम्॥ [3]**प्रयोगविषय इति** कर्मधारयः। प्रयोगादन्यत्रानभिव्यज्यमानतया प्रयोगो विषय इत्युक्तः॥ **अल्पेति**। यथा मुद्गादणित्यादेः॥ ननु [4]ऋकारेऽच् कार्यप्रवृत्तावपि ल्टकारे

---

१ तद्वारणाय प्रत्यय इत्येतत् ॥ क ॥ २ अथ ऋटकारेति ॥ इ ॥
३ भाष्ये ॥ ४ ऋटकारे कार्यप्रवृत्तावपि ॥ क ॥

कथं तत्कार्यादात्तत्वादीनां दर्शनमत आह **तचेति** ॥ **स्थानेऽन्तरतम इतीति**। यद्यपि **ऋपो रो ल** इत्यत्र रेफलकारयोः स्थान्यादेशभावस्तथापि तद्द्वारा ऋकारल्लकारयोरपि स इति भावः ॥ **अर्थगतमिति** ॥ शब्दातिरिक्तमर्थरूपमित्यर्थः। यद्वा व्यक्तेरेव वाच्यता तस्यां [1]प्रकारताविशेष्यताख्यविषयतादयाङ्गीकाराच्छक्तिग्रहोपपत्तिः सविकल्पकोपपत्तिश्च तत इति भावः ॥ **प्रयोक्त्राभिप्रायेणैवेति** ॥ शक्तिबोधनं प्रयोक्त्राधीनमिति भावः। अन्यथा शब्दार्थसम्बन्धस्यानित्यतापत्तिः। एवं च स्वेच्छयैकस्यां व्यक्तौ सङ्केत्यमानः शब्दो यदृच्छाशब्द इति बोध्यम् ॥ ननु ऋकारस्याच्त्वे ऋल्लवर्णयोः सावर्ण्यात् ऋकारेण ल्लकारस्यापि[2] ग्रहणाद्च् कार्यसिद्धौ किं ल्लकारोपदेशेनेत्यत आह[3] **ल्लकारेति** ॥ **उपदेशः कृतइति**। पाणिनये ग्विवेनेति शेषः। वस्तुतोऽच तस्यानुपदेशेऽप्रामाणिकत्वशङ्कया सवर्णविधिरपि तयोर्वक्तुमशक्य इति तदुपदेशः। सवर्णविधिद्वारकं फलमपि ल्लत्वय एवेति तत्रैव प्रयोजनोपन्यास इति बोध्यम् ॥ ननु सन्तमसन्तं वा क्रियायोगमर्थगतमङ्गीकृत्य डित्यादीनामपि व्युत्पत्तेरर्थगतार्थरूपप्रवृत्तिनिमित्तानपेक्षशब्दसत्त्वे किं मानमत आह **अर्थवदिति**। चिन्त्यमिदं बहुच्पूर्वे तस्य चारितार्थ्यात्। एतदर्थं तद्धितपदं तद्विशिष्टपरम्। अप्रत्यय इत्युक्तेश्च पचतकीत्यादौ न दोषः। प्रत्ययश्च तद्धितभिन्न एव। बहुपटवस्तिष्ठ-

---

१ तस्यां च ॥ क ॥

२ ग्रहणाच् कार्यसिद्धौ ॥ क ॥

३ ऋकारेति ॥ क ॥

न्तीत्यादौ यं समुदायमिति न्यायेन न दोष इति कैयटाशयं मन्ये ॥ ननु खतकस्यामाधुत्वात्कथं [1]शास्त्रविषयतेत्यत आह **गाय्यादीनामिति** ॥ खतकेन खतकानिवृत्तौ हेतु**रर्थाश्रयेणेति**। खगतक्रियारूपार्थाश्रयेणेत्यर्थः। अर्थतः सजातीयस्यैव निवृत्तिः। एकप्रवृत्तिनिमित्तकत्वे सति अन्याख्यातमनन्याख्यातस्य निवर्त्तकमिति भावः। तद्ध्वनयन्नाह भाष्ये **चतुष्टयीति**। शब्दानामर्थे या प्रवृत्तिः सा प्रवृत्तिनिमित्तभेदात् प्रकारचतुष्टयवतीत्यर्थः। तत्र यदृच्छाशब्दो नाम वक्त्रा स्वेच्छया सन्निवेशितः। स चानेकविधः। एकव्यक्तिसन्निवेशितो डित्थादिरेकस्तत्र न किञ्चिदतिरिक्तं प्रवृत्तिनिमित्तमानन्त्यव्यभिचारयोरभावात्। किन्तु शक्त्यैवार्थस्य विषयतादत्येन भानम्। तदुत्तरत्वादेः प्रकारत्वावच्छिन्नः स एवार्थः। यद्वाशब्दपराद्वाच्येऽर्थ एव त्वादिः। एवं क्वादिपदानां कादीनामेकत्वमते तेषु शक्तिः। ततो डित्थादिपदादिव शक्त्यार्थ एव त्वादिः। कुत्वमिति कुरिति च पर्यायौ। अनेकत्वमते तत्तज्ज्ञात्युपलक्षिते वा। टिघुभादीनां तु तच्छक्यानामानन्त्यात्तत्पदमेव प्रवृत्तिनिमित्तं तदेव च तदुत्तरत्वाद्यर्थः। भत्वादिपदैर्भादिसंज्ञैवोच्यते। अतएव वृद्धिसूत्रे वक्ष्यति कुत्वं कस्मान्न भवति चोः कुः पदस्येति भत्वात्कथमसंज्ञेति। अनेन च भाष्येण कुकुत्वपदयो[2]र्भत्वभसंज्ञापदयोः पर्यायत्वं स्पष्टमेवोक्तम्। संज्ञा च पदमेव ॥ ननु चतु-

---

१ शास्त्रीयविषयता ॥ क ॥

२ भत्वसंज्ञा ॥ क ॥

र्विधेष्व[1]नुकरणशब्दाः क्वान्तर्भवतीत्यत आह **अशक्तिजेति** ॥ **यस्मादिति**। अनुक्रियमाणशब्दव्यक्तयो वक्तुः प्रत्यभिज्ञातु जातिनिबन्धना रूपसादृश्यनिबन्धना वेतिभावः। एतेऽपि यदृच्छाशब्दाः स्वेच्छयैव वक्त्रा शब्दपरतया प्रयोगादित्यन्ये। भृत्यादिकञ्च **गुरोरनृत** इति श्रुतेः। **अनचिचेति** द्विलम्। प्रपूर्वाल्लपेरन्तर्भावितण्यर्थात्कर्मणि क्ते **गतिरनन्तर** इति पूर्वपदप्रकृतिस्वरे वर्ज्यमानस्वरेण श्रिष्टस्यानुदात्तत्वे उदात्तादनुदात्तस्येति स्वरितत्वम्॥ **अनृत** इति निषेधस्तु न[2] ऋदिद्लृदिदिति पृथगनुबन्धकरणेन क्वचित् परस्परागृहणज्ञापनात्॥ **न्याय्य इति**। संज्ञात्वेन कल्पयितुमिति शेषः। तच्च हेतुमाह **क्वदन्तमिति** ॥ प्रकृतिप्रत्ययादिविभागेनाव्याख्यातत्वमेव न्याय्यत्वमित्याशयेन शङ्कते **सर्वशब्देति**। श्रिष्टप्रयुक्तत्वमपि न्याय्यत्वमिति परिहारः। न च तस्यैव प्रयोगे लृतकशब्दो बोधकोऽपि न स्यादिति वाच्यम्। बोधकत्वेऽप्यसाधुत्वान्न शास्त्रीयकार्यनिमित्तत्वमित्याशयात्। तद्ध्वनितं भाष्ये **साधुमन्यन्त** इति ग्रन्थेन॥ [3]**ऋतक एवासाविति**। ऋतकशब्दप्रतिपाद्य एवासौ न लृतकशब्दप्रतिपाद्य इत्यर्थः॥ **इदानीन्विति**। भाष्ये **कल्पयितव्य** इत्यस्य विनियुक्तत्वेन ज्ञेय इत्यर्थः। साधुर्ऋतक एव नामत्वेन कृतो न लृतकः। अशक्त्या तु तथोच्चारणमित्यपभ्रंशत्वान्न शास्त्र[4]-

---

१ अन्तःकरणशब्दः क्वान्तर्भवतीति ॥ क ॥

२ ऋदिति लृदिति ॥ क ॥

३ भाष्ये।

४ शास्त्रीयविषयः ॥ क ॥

विषय इति भावः। **अशक्तिजत्वादिति**। जिह्वाऽपाटवजत्वादित्यर्थः। एवञ्चामाधुरेवेति भावः। लृतकाङ्कृफिङ्डे वैषम्यं दर्शयति **लृतकशब्द इति॥ लृतकशब्दस्येति**। अनद्याख्यातस्येत्यादिः। फिङफिङ्डयोरुणादिष्वदर्शनादाह **उणादय इति**। बाहुलकमिङ्डावेताविति भावः॥ [१]**अर्त्तिप्रवृत्तिश्चैवेति**। तथाच फिङफिङ्डयोः स एव प्रकृतिर्न तु ल्ट इति धात्वन्तरं कल्प्यम्। संज्ञासु धातुरूपाणीति तु अनादिप्रसिद्धप्रयोगसाधने उपायमात्रं न त्वाधुनिकक्रियमाणसंज्ञानुग्राहकमिति भावः॥ एवं च देशभाषानुसारेण क्रियमाणं कूचीमञ्चीत्याद्यसाधु शास्त्राविषयस्येत्युक्तम्॥ **अर्त्तेरिति**। यतस्तस्य लोके प्रवृत्तिर्लक्ष्यतेऽतः फिडादिप्रकृतित्वेनापि तस्यैव प्रवृत्तिरित्यर्थः। एवं यदृच्छाशब्दानङ्गीकृत्य शास्त्रान्वितानां क्वचिच्छिष्टप्रयुक्तानामेव यत्र कुत्रचित् संज्ञात्वेन विनियोगो नान्येषामित्येव[२]। लृतकल्फिङ्डादीनां शास्त्रविषयत्वाभावान्न तदर्थं लृकारोपदेश इत्युक्तम्। इदानीं न सन्त्येव यदृच्छाशब्दा इति पत्त्वावष्टम्भेन तदर्थत्वं प्रत्याचष्टे भाष्ये **चयीचेति**। चेनेदं ध्वनितम्॥ नन्वेवं डित्यादीनां क्वान्तभावोऽत आह **अद्यत्वेऽपीति**। एवं च सर्वेऽपि व्युत्पन्नाः क्रियादिशब्दा एवेति भावः। **प्रशस्यरूपेति**। अत्यन्तप्रशंसायोग्येत्यर्थः॥ एवं च येषां [३]क्रियागुणादिप्रवृत्तिनिमित्तकत्वं तेषां क्रियाद्योतेनार्थबोधकत्वमिति तात्पर्यम्। यद्वा[४] पूर्वपूर्वगत-

---

१ भाष्ये। २ नान्येषामित्येवम्॥ इ॥ ख॥

३ गुणक्रियादि॥ क॥ ४ पूर्वपूर्वडित्यादिगत॥ क॥ इ॥

ङित्यादिगतप्रशस्तगुणक्रियारोपेण तत्प्रवृत्तिनिमित्तक एव [1]ङित्यादिभ्यो बोधः। आद्ये ङित्ये तु तङ्कर्तरेव विषयतादृयेन भानमिति सैव प्रवृत्तिनिमित्तमपीति **तस्य भाव** इति सूत्रे भाष्ये उपपादयिष्यते॥ **अव्युत्पन्नौति**। संज्ञाशब्दा अव्युत्पन्ना इति पक्षाश्रयणेनेत्यर्थः॥ **आचार्येणेति**। शिवो वेदपुरुषो वाचाचार्यः। एवं च यदृच्छाशब्दसङ्गावाश्रयेण प्रयोजने उक्ते तदनाश्रयणेन तत्प्रयोजननिराकरणमयुक्तमिति भावः। कृतकशब्द कृतकशब्दस्य साधुत्वाभावकल्पक इत्याद्यं दूषणमप्ययुक्तमित्याह भाष्ये **समानेचेति**। तत्रार्थशब्दः प्रवृत्तिनिमित्ताभिप्राय इत्याह **इहचेति**॥ तच्छब्दस्वरूपस्य व्यक्तिस्वरूपस्य वार्थे प्रवृत्तिनिमित्तत्वेनाधान इत्यर्थः॥ **विपर्यय इति**॥ क्रियाप्रवृत्तिनिमित्तमित्यर्थः। **भिन्नस्वरूपौ** भिन्नप्रवृत्तिनिमित्तौ। यदि तु कृतकोऽपि शब्दप्रवृत्तिनिमित्तिकस्तदा भिन्न[2]रूपत्वादेव प्रवृत्तिनिमित्तविपर्ययः। व्यक्तेरेव प्रवृत्तिनिमित्तत्वमितिपक्षे कृतकसङ्केतविषयव्यक्तेर्ल्लृतकसङ्केतविषयव्यक्तिभिन्नैवेति तद्विपर्ययोक्त्येवेति बोध्यम्॥ भाष्ये समाधत्ते **पक्षान्तरेरपीति**॥ **जातिपक्षेत्विति**। यत्तु अश्वादिनानार्थानामेकशेषाय तत्पचेऽप्यावश्यकमिति तत्तु जातिगतजातिस्वीकारेण परिहृतम्। पक्षान्तरैरपि परिहाराभवन्नीति वार्त्तिककृतैवमुक्तम्। वस्तुतश्चतुष्टयीपक्षेऽपि दोषपरिहारः सुकरः। यदुक्तम्कृतको न स्मृतकनिवर्त्तक इति माभूत्तस्य निवर्त्तकत्वं शिष्टप्रयोगाभावात्तुतन्निवृत्तिः। न्याय्यत्वमपि वार्त्तिके

---

१ ङित्यादिशब्देभ्यो बोधः॥ क॥

२ भिन्नस्वरूपत्वादेव॥ क॥

शिष्टप्रयुक्तत्वमेवेत्य[1]भिसन्धाय भगवतानुक्तमपि स्वयं मन्दबुद्धानुग्रहाय स्फुटमाह **अव्युत्पन्नेति । पारम्पर्यागताः** । अनादयः । एवं च शिष्टाप्रयुक्तयदृच्छाशब्दा असाधुत्वेन शास्त्राविषया इति भाष्यतात्पर्यम् । यत्तु चतुष्टयीतिपचे स्नुतकादीनां टिघुभादिवच्छास्त्रविषयत्वमेवेत्यस्माद्भाष्यान्नभ्यत इति तन्न । पक्षभेदेनैकस्य शास्त्रविषयत्वतदविषयत्वाङ्गीकारे **न वेति** सूत्रस्यभाष्यविरोधात् । टिघुभादीनां पाणिन्यादिशिष्टप्रयुक्तत्वेन साधुत्वाच्छास्त्रविषयत्वेऽपि अन्येषां तद्विषयत्वे मानाभावाच्च । किञ्च साध्वसाधुबहिर्भूतानामपि शास्त्रविषयत्वे साध्वनुशासनेऽस्मिन् शास्त्रे इति तत्र तत्र भाष्योक्त्यसङ्गतिः । किञ्च शास्त्रविषयत्वमथ तद्बुद्ध्यसाधुत्वाभाव इत्यग्रक्ष्यमिति दिक् ॥ अनुकरणं शिष्टस्य वा अशिष्टाप्रतिषिद्धस्य वा भवति । तत्राद्यं साधु अन्त्यन्नदोषाय नाप्यभ्युदयायेति भाष्येऽन्वयः ॥ अर्थात् प्रतिषिद्धाऽनुकरणस्य दुष्टत्वं बोध्यम् ॥ ननु शिष्टानुकरणं नामाधु अशिष्टाप्रतिषिद्धस्य वा नामाधु । आद्यस्याभ्युदयजनकत्वात् । अन्त्यस्याभ्युदयाजनकत्वेऽपि दोषाजनकत्वात् । एवं च प्रकृते किमायातमत आह **अनुकार्य्यस्य दुष्टत्वादिति** । अर्थलब्धं तदादाय प्रकृतोपयोग इत्यर्थः । अत एव भाष्ये तदृष्टान्तेनोपपादयिष्यति । [2]**यत्तु खल्विति** । एवञ्चासाध्वनुकरणस्यासाधुत्वाच्छास्त्राविषयत्वात्तदर्थता लकारोपदेशस्य न युज्यत इति भावः ॥ भाष्ये **यजेत वेति** । यागोऽत्र स्मार्त्तो ग्राह्यः ॥ **सादृश्याभावादिति** । [3]नचैकजातीये-

---

१ अभिधाय ॥ क ॥ २ भाष्ये ॥ ३ नवैक ॥ क ॥

ष्वपि व्यक्तिभेदेन[१] सादृश्यसम्भवः। सुरापानत्वादेरेव तादृग्स्थले सादृश्येन तदतिरिक्तसादृश्याभावादित्याशयात्। तदाह **नास्त्येति**॥ दानादीनां कथं लौकिकत्वेनोपन्यासोऽत आह **स्मार्त्तत्वादिति**॥ **अस्वस्थेनेति**। आस्तिकत्वे सत्यपीति भावः॥ **माल्यगुणकण्ठ इति**॥ मालायां साधूनि माल्यानि पुष्पाणि तैर्युक्तो गुणः सूत्रं कण्ठे यस्येत्यर्थः। **गड्वादि**त्वात्परनिपातः। **अकार्यं हीति**। इह लोके भीरुणेत्यर्थः॥ भाष्ये प्रयोजनप्रत्याख्यानवादीशङ्कते **एवमिहापीति**॥ प्रयोजनवादीसमाधत्ते [२]**अयन्त्वन्य इति**। अर्थभेदेन साधुत्वे दृष्टान्त आह। **अस्वेति**॥ [३]**अस्य हीति**॥ एवं च [४]तदर्थे व्याकरणा[५]ननुगतत्वमपशब्दत्वमिति भावः॥ भाष्ये तुच्यतु दुर्जनन्यायेन साध्वनुकरणार्थत्वम् लकारोपदेशस्याह **अयं खल्वपीति**। यद्यप्यर्थशून्यवर्णानां न साधुत्वं तथापि वर्णात्कारविधानेन तेषां साधुत्वमिति भावः॥ [६]**भवेत्तदर्थेनेति**॥ तदर्थेन क्लृपि[७]स्थलकारार्थेन लकारस्यो[८]पदेशेन प्रयोजनं न भवति। एवं यद्यपि भवेत् तथापि तदनुकरणार्थे नार्थ इत्यर्थः॥ ननु क्लृपि स्थस्याभिद्धत्वात् कथं तदनुकरणमत आह **प्रयोगस्थस्येति**॥ **प्रयोगे** अनुकरणप्रयोगे। शास्त्रे तदीयकार्ये वाऽभिद्धत्वं पौर्वाप-

---

१ व्यक्तिभेदेनैव ॥ क ॥ २ भाष्ये ॥
३ "अस्य हीति" "हि" इति आदर्शपुस्तकचयस्थकैयटपुस्तके नास्ति ॥ ४ तत्तदर्थे ॥ क ॥
५ व्याकरणानुगतत्व ॥ सं ॥ ६ भाष्ये ॥
७ क्लृपिस्थ लकारार्थेन ॥ क ॥ ८ उपदेशे ॥ ॅ

र्यस्य तत्रैव सम्भवात्तत्रैवं प्रकृते इति भावः॥ **ऋकारद्वारेणेति।** ऋकार बुद्ध्येत्यर्थः॥ भाष्ये **द्विः पचन्त्विति।** पचन्त्विति द्विरा-हेत्यन्वयः। असत्यतिदेशे तिङन्तत्वाभावे हेतुमाह **एतच्चेति॥ ह्यर्थेति।** एतदर्थमेव द्विवचनमित्यन्वर्थसंज्ञाकरणम्॥ **नन्विति।** एवं च पाठाभावे मूलस्यैवाच्त्वाभावात्कथं तदनुकरणेऽच् कार्यमिति तदर्थ उपदेश आवश्यक इति भावः॥ **अनुमीयन्त इति।** इदञ्चिन्त्यम्। आनुमानिकवचनेन कृतस्य वर्णस्य प्रत्याख्यानायो-गात्। तस्माद्गम्ल इत्यादिस्थ लकारो धर्माजनकत्वान्न साधुरिति वक्तुं युक्तम्। एवञ्चाग्नक्रिजानुकरणेति वार्त्तिकेऽग्नक्रिजपदं [1]व्यर्थ-मिति कैयटतात्पर्यम्॥ एवं साध्वनुकरणार्थत्वे लकारोपदेशस्य प्रकृतिवदित्याश्रयणेन खण्डिते तेनैवाग्नक्रिजानुकरणार्थत्वमपि खण्ड-यति पूर्वपक्षी भाष्ये **यदि प्रकृतिवदिति॥** ननु माभूदप-शब्दोपदेशः प्रकृतित्वं तु कथं नेत्यत आह **प्रकरणादिति॥** अतिदेशस्य शास्त्रीयत्वमनेन दर्श्यते। तत्र च प्रत्यासत्याशास्त्रीयप्रकृ-त्यादेरेव ग्रहणमुचितमिति भावः॥ उपलक्षणं भाष्यमित्याह **शास्त्रनिबन्धनं चेति।** नापि तदतिदेष्टुमित्यादिचिन्त्यम्। अत्रा[2]ह्मणे ब्राह्मणत्वाद्यतिदेशवत् सम्भवादिति कश्चित्। **तदेव-मिति।** अग्नक्रिजस्य शास्त्रीयप्रकृतित्वाभावान्न तदनुकरणेऽतिदेश-प्रवृत्तिरित्यपशब्दत्वाभावाद्[2]च्कार्यसिध्यर्थम् लकारोपदेश इत्यर्थः॥

---

१ अनर्थकम्॥ क॥

२ ब्राह्मणे अब्राह्मणत्वाद्यतिदेशवत्॥ क॥

इदानीं श्रुताद्यर्थत्वं तस्य परिहरति भाष्ये **एकदेशेति** ॥ **रेफभागस्येति**। वर्णैकदेशो वर्णग्रहणेन गृह्यन्त इतिपक्षे इत्यर्थः ॥ **प्रत्यभिज्ञानादिति**। एवं च छिन्नपुच्छश्वदृष्टान्तेन लोकन्यायसिद्धमस्य ज्ञत्वमित्यर्थः ॥ व्याख्यानभाष्येऽ**नन्यवदित्यस्यान्यवच्चेत्यर्थः**। अन्यसादृश्यस्यापि निषेधे तत्त्वं दृढीकृतम्। सिद्धान्त्येकदेशौ वर्तिं दृष्ट्वा स्थानिवत् **सूचमनेनोपन्यस्तमित्याशयेन**[1] आह **षष्ठीनिर्दिष्टस्येति**। तत्सम्बन्ध्येकदेशविकृतमादेशरूपमित्यर्थः॥ **नन्वस्रोपोऽन** इत्यत्रापि षष्ठीनिर्दिष्ट एवेत्यत आह **राज्ञ इति**। येन विकारेण यस्य विकृतस्य यद्रूपमेकदेशविकृतन्यायेन प्रार्थ्यते तद्रूपावच्छिन्नस्य तेन रूपेण तद्विकारविधौ षष्ठीनिर्दिष्टस्येति तदर्थ इति भावः ॥ भाष्ये **श्रुतो न प्राप्नोतीति** द्विर्वचनादेरप्युपलक्षणम्। [2]**कस्तर्हि रेफ इति। क्रप** इति लवयवषष्ठीति भावः। [3]**क्रप उरिति** क्रपे रेफस्य लस्तदवयव ऋकारस्य च लकारघटित आदेश इत्यर्थः॥ स्थानिनिर्देश एव तादृशादेशकल्पक इति भावः॥ एतेन तस्यावयवषष्ठ्यन्तत्वेन स्थानषष्ठीनिर्दिष्टत्वाभावादिदञ्छिन्नमित्यपास्तम् ॥ ननु स्थानिवत्सूत्रे हि तथा प्रकृते च न तेनातिदेश उच्यते किन्तु छिन्नपुच्छश्वदृष्टान्तेन प्रत्यभिज्ञयाऽनन्यत्वमुच्यते। तत्र षष्ठीनिर्दिष्टस्येति वक्तुमेवाशक्यमित्याशयेनाह भाष्ये **अथवेति**। ननु कादेशेऽनत्वमिवैकदेशविकृतन्यायेन नकारान्तत्वमपि कुतो नेत्यत आह **न च राजन्निति**॥ एकदेशपदेन समम्बन्धिकतयोपस्थितावयवविधर्म एव विकारविशिष्टे आ-

---

१ उपन्यस्तमत आह ॥ क ॥ २ भाष्ये- ॥ ३ भाष्ये ॥

रोप्यते नत्ववयव एव लोकव्यवहारादिति भावः॥ भाष्ये **इह तर्हीति**। एकदेशविकृतन्यायेन क्त्वादिति भावः॥ [१]**रोऽस्यास्तीति** इदं चिन्त्यम्। अवयवादावेव मत्वर्थो नानन्तरादाविति **वर्त्तक** इत्यादौ रवलस्योपपादयितुमशक्यत्वात् नित्ययोगपर्यन्तधावनमफलमिति॥ भाष्ये **स एष इति**॥ श्रुत्यार्थं विद्यमानत्वकारोपदेशोऽरवतो हरवस्येति गुरुन्यासरूपसूचभेदेन प्रत्याख्यायत इति यत्तदयुक्तमित्यर्थः॥ कुत इत्यत आह **सैषेति**। यतः सैषा प्रत्याख्यानात्मिका उक्तिः। महतो वंशस्तम्बाल्लट्वानुकर्षाभिन्नेत्युक्ते यथा महतो वंशस्तम्बाल्लट्वानुकर्षणमयुक्तम्। एवं त्वकारप्रत्याख्यानमिति गम्यते। तदाह **निष्प्रयोजनमिति**। सूत्रभेदपरिकल्पनं विना क्लृप्तग्रिखे श्रुतसाधनस्याशक्यत्वान् निष्प्रयोजनमित्यर्थः॥[२] **वंशस्तम्बादिति** त्वब्लोपे पञ्चमी तमवलम्ब्येत्यर्थः। लट्वा पक्षिविशेषः फलविशेषो वा। तद्यथा वङ्कायामसाध्यमल्पफलं न युक्तन्तथा त्वकारोपदेशप्रत्याख्यानमपीत्यर्थः॥

ए ओङ्। ३॥ ऐ औच्॥ ४॥ विचार्यत इति। क्त्वा चिन्तान्यायेनायं विचार इति बोध्यम्। इदं पदार्थमाह **तपरेति॥ असत्त्वभूतेति**। एवञ्चेदमापरात्पर्गोऽनुपपन्न इति भावः॥ **बुद्ध्या परामृष्टेति**। उपदेशपदार्थभूतेत्यर्थः॥ **कर्मभावमिति**। इदंपदवाच्यत्वे नेतिभावः॥ **यथेति**। इदं चिन्त्यम्। कर्तृकर्मेतरकारकाभाववत्त्वस्यैवासत्त्वपदार्थत्वात्॥ पक्षद्वये स्वरूपवैलक्षण्यस्यानुभवसिद्धत्वेन तद्विषयः प्रश्नोऽनुचितो-

१ इङ्गलण्डीयपुस्तके "रोऽस्य–" इत्यारभ्य "फलमिती" त्यन्तं नास्ति॥
२ भाष्ये॥

ऽत आह **कार्ये** इति। भेदाभावादुद्देश्य विधेयभावोऽनुपपन्न इत्याशङ्क्य परिहरति **यद्यपीत्यादि** ॥ **फलं चेदिति**। सम्प्रदाने घञितिभावः। फलस्यैव करणत्वविवक्षया करणे घञित्यन्ये॥ **सन्धीयमानावयवत्वादिति**। अ इ उणिति गृह्यमाणवर्णसदृशावयवसन्धानेनास्य निष्पन्नत्वादित्यर्थः॥ भाष्ये **श्रुतिग्रहणं** चिमाचपरम्। आदिना चतुर्माचग्रहणम् ॥ **नन्वोमभ्यादाने** इत्यादौनाऽन्तरतमपरिभाषासंस्कृतेनैज् रूपश्रुतविधानादनच्त्वेपि तेषां श्रुतसंज्ञा भविष्यतीत्यत आह **तचैचामिति**। ताभ्यामपि तेषां यथाकथञ्चिदान्तरतम्यसत्त्वादिति भावः ॥ भाष्येऽर्ध **एकार इति**। मात्रिकत्वेनार्धत्वम्। समांशवाचिनोऽपि पुंस्त्वमेतद्भाष्यप्रामाण्यात् ॥ भाष्ये **तेनाप्येतद्वक्तव्यमि**त्यत्र एतच्छब्देन नियामकं सूत्रं परामृश्यते। सूत्रन्यासभेदेऽपि गुरुलाघवतो विशेषो नास्तीत्याह **सूत्रारम्भं प्रतीति** ॥ **विश्लिष्टेति** ॥ उपलभ्यमानेत्यर्थः ॥ **संश्लिष्टेति**। स्पष्टमनुपलभ्यमानेत्यर्थः॥ एवं चेङ् विषये नावर्णप्राप्तिः। **अर्द्धैङोस्तु** तपरनिर्देशेऽनच्त्वाद् ह्रस्वत्वमेव नेतिभावः। एङोः शुद्धतालव्यत्वमेवेति न तयोः स्थानेऽवर्णप्राप्तिरिति तत्त्वम्। **संश्लिष्टावर्णाविति** कैयटस्याप्यत्रैव तात्पर्यमिति ॥ भाष्ये **प्रत्याख्यायते एतदिति**। एतद् ऐञ्विषयम् एच इति सूत्रम्। वर्त्तमानसामीप्ये लट्॥ **भूयसाचेति**। तद्द्वारकभूयः स्थानसाम्यादित्यर्थः॥ भाष्ये **इदमपीति**। एङ्विषयमपीत्यर्थः। **सस्थानत्वादिति**। इकारोकाराभ्यां समानस्थानत्वादित्यर्थः। तदाह **तालव्य इति**। तालव्य एवेत्यर्थः। इदञ्च मतमष्टमेऽपि भाष्ये स्पष्टम्। शब्दपरविप्रतिषेधेनोत्तरभाग-

सदृग्र इति विवरणोक्तन्तु चिन्त्यम्। अन्तरङ्गत्वेन पूर्वसदृग्रस्त्वेवापत्तेः। स्पष्टं चेदं नित्यः परयणादेग्र इत्यादिनाच्चः **परस्मि**न्नित्यत्र-भाष्ये। भाष्ये **तावेवेति**। लाघवादिति भावः॥ **ग्रहणमिति।** प्रदेग्रेष्विति ग्रेषः॥ नन्वेवं मात्रिकयोरेव गुणसंज्ञास्यादत आह **गुणेति**। एवमपि अत्र ह्रस्वपाठेऽर्धमात्रालाघवं भवति। **अकारस्यार्धमिति।** [1]**सुजाते ए अग्रे**ति अकारलेखस्तु प्रामादिकः। ग्रास्त्रविग्रेषाध्यायिनां समवायः परिषत् पर्षद्वा तत्र भवा क्तिरित्यर्थः। तदेवमतपरवादिमतसाधारण्ये**नैच इ**गिति सूत्रस्य कर्त्तव्यताकर्त्तव्यते उपपाद्यतपरवादिमतेऽसाधारणं दूषणमाह भाष्ये **एकादेग्रे इति**। एकः पूर्वपरयोर्दीर्घ इति सूत्रं कार्यमित्यर्थः॥ **अन्यस्यासम्भवाद् इति**। अयं भावः। यथा **स्याद्व्योरि**त्येत्रातपरत्वे स्याघ्व्योर्दीर्घस्य स्थाने घुमास्थेत्येव दीर्घकारे सिद्धे पुनर्वचनमदीर्घार्थमित्यविग्रेषाद्ह्रस्वप्लुतयोः प्रसङ्गे तदुक्तं **प्लुतश्च विषये इति।** एवं च दूराद्धूतादिविषयेऽप्यनेनैव प्लुते पत्वेऽनुवाद दोषस्तत्र। दृहतु प्लुत एव प्राप्नोतीति खट्वा इन्द्र इत्यादिविषयकग्रास्त्रवैयर्थ्यमेवेत्यनुवाददोषः सोढव्य एवेति वैषम्यमिति॥ [2]भाष्ये **यः स इति**। प्रसिद्ध्यर्थकम्॥ **वा छन्दसीत्यचेति**। वा छन्दसीत्यस्यानुवृत्यर्थमित्यर्थः॥ **पूर्वरूपार्थेति**। पूर्वव्यक्त्यात्मकपूर्वरूपार्थेत्यर्थः॥ भाष्ये **पर इतीयतेति**। ह्रस्वत्वादिरूपमिति भावः। सिद्धान्ते रूपग्रहणं स्पष्टार्थमेव। अस्य भाष्यस्य पूर्वपक्ष्युक्तित्वात्॥ [3]**अकारो**-

---

१ भाष्ये॥　२ वस्तुतोऽस्य टित्वाभावादेतद्विषये प्लुताप्रवृत्तेश्चिन्त्यमेवेदमिति स्याघ्व्योरिति सूत्रे निरूपयिष्यामः॥ क॥　३ भाष्ये॥

नेति। रपरत्वेऽपि द्विमात्रत्वरूपदीर्घत्वासम्भव एव ॥ [१]**विगृहीतस्येति**। दीर्घश्रुतिपरिभाषयोर्विरोधेन जातिपक्षे व्यक्तिपक्षे वा तद्विषयकलक्षणानुपपत्तेरादिति भावः॥ ननु गुणवृद्धिसंज्ञयोस्तपरत्वाभावात् पूर्वोक्तदोषापरिहृतेश्च भाष्यमयुक्तमित्याशङ्क्याह **तपरसंज्ञौति**। तपरशब्दनिर्दिष्टे संज्ञिनि गुणवृद्धिसंज्ञे प्रवर्त्तेते इत्यर्थः। एवं च त्रिमात्रादीनां तत्र संज्ञितयाऽनिर्देशान्नोक्त दोष इति भावः। भाष्ये **ननुचेति** ॥ एवंचैङैचौ न तपराविति भावः॥ [२]**नेत्याहेति**। स एव तपर इति नेत्याहेत्यर्थः॥ अर्थभेदेन शब्दभेदे **तन्त्रन्यायेति**। तद्भेदेऽपि शब्दैक्यपक्षे आह **एकस्यैव द्विशक्तित्वादिति** ॥ **एकशेषेति**। समाहारद्वन्द्वविषये एकशेषाभावेनैकवचनानुपपत्त्येदं चिन्त्यम्। सुखमुखार्थं इति पाठे मयूरव्यंसकादित्वात्समासः॥ नन्वेङैजिति संज्ञायास्तात्परत्वेऽपि संज्ञिनामेकारादीनां किमागतमिति चेन्न। तपरशब्दबोध्योऽपि वर्णस्तत्कालस्यैव संज्ञेत्यर्थान्न दोषः॥ **गुणानाञ्चेति**॥ अण्सु गुणानां तत्त्वाभावेऽपि अनण्त्वादेव दीर्घादिविषये तत्त्वमितिभावः॥ ननु दिवे दिव उदित्यत्र तत्कालग्रहणं न स्यादत आह **तपरसूत्रे चेति**॥ **इहेति**। तपरसूत्रे दकारानाश्रयणेनचेत्यपि बोध्यम्। **यकारस्थानिक इति** ॥ तस्य चैतद् दृष्ट्याऽसिद्धत्वान्न तत्र तपरसूत्रप्रवृत्तिरितिभावः॥ अवयवग्रहणेना[३]वयवसदृशवर्णग्रहणेन ग्रहणं स्यान्न वेति भाष्यार्थः। तत्फलितमाह **तत्र केवलेति** ॥ नन्वकारेण एङ-

---

१ भाष्ये ॥ २ भाष्ये ॥ ३ अवयवसदृशग्रहणं स्यात् ॥क॥

वयवग्रहणसन्देहवद् अकारादीनामेङादिसंज्ञा प्राप्नोतीति विचारोऽपि कुतो नेत्यत आह **तच्च समुदायेति**। अत एव प्राटतीत्यादौ न पररूपम्। तत्र दृष्टान्तमाह **अवयवपरेचेति**। यथावयवपरे निर्देशे समुदायो न संज्ञाभाक्। एवं समुदायपरे निर्देशेऽवयवा न तद्भाज इत्यर्थः। तदुपपादयति **यथेति**॥

अन्यचेति। सर्वस्यावयवस्यान्यच्च पृथङ् निर्देशे समुदाय निर्देशः स्वपर एव। सर्वस्यावयवस्यान्यत्रानिर्देशे तु समुदाय निर्देशोऽनिर्दिष्टावयवपर इति विवेकः॥ नन्वेजादिसंज्ञानामवयवावृत्तित्वे कथमेचो निवर्त्तकेनायादिना तदवयवस्य निवृत्तिरत आह **तच्चासत्यामपीति**। तन्निवृत्तिं विना समुदायनिवृत्तेः कर्त्तुमशक्यत्वादितिभावः॥ **अवयवकार्यं** दीर्घः। **समुदायकार्यम्** अय्। **तच्च साक्षादिति**। दीर्घे। अयादिकार्ये हि समुदायव्यवधानेनावयवो नोदितो न साक्षादिति भावः॥ साक्षाच्चोदितत्वं प्रत्यक्षत्वे हेतुः। नन्वयादिरनवकाशोऽत आह **अयादीनामिति**॥

नन्विति। ततश्च विच्छब्दान्तरपूर्वकोऽयादिः सर्वस्य बाधकः स्यादिति भावः॥ परिहरति **येनेति**॥ **प्राधान्येनानिर्देशादिति**। अस्यैजादिसंज्ञाभावेऽपि स्वतन्त्राकारेणाग्रहणं स्यादिति शेषः॥ **भाष्येऽभ्यन्तरश्चेति**। तदुच्चारणं विना समुदायोच्चारणस्याशक्यत्वादित्यर्थः॥ तदाह [1]**तद्यथा दृक्ष इति**॥ तदुपपादयति **तिरोहितत्वादित्यादिना**॥

---

१ भाष्ये॥

[1]**समुदायकार्ये पारतन्त्र्यादिति।** समुदायसम्पादनरूपे कार्ये पारतन्त्र्यादित्यर्थः॥ **स्वकार्यस्याप्रयोजकत्वादिति।** स्वकार्यनिरूपितप्रयोजकत्वाभावादित्यर्थः॥ तत्प्रयोजकत्वाभावे हेतुः। **नरसिंहवदिति।** तदवयवे नरत्वाद्यभाववदेतदवयवेऽप्य[2]त्वाद्यभाव इति भावः॥

वचनादिति। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ दश-समाना इति पूर्वव्याकरणवचनादित्यर्थः॥ **समानकार्यम्।** अणूप-समानाचरकार्यमित्यर्थः। **सवर्णकार्यमिति** पाठे सवर्णदीर्घरूप-कार्यमित्यर्थः॥ भाष्ये **दीर्घाच्छे इति॥** दीर्घस्य छे तुगिति हि तदर्थः॥ ननु **ह्रस्वस्येत्यत्राच इत्येवसिद्धे ह्रस्वग्रहणसामर्थ्यादेव** तुग्नेतिचेन्न। पदलाघवाभावादित्याशयात्। [3]**अस्तिहीति।** तत्र दीर्घादित्यस्याभावे कुच्छायेत्यादावपि विकल्पः स्यादिति भावः॥

असिद्धवदिति। चिणो लुङ् न्यायेनेति भावः। भाष्ये **उत्तरार्थमेतदिति।** "इह किंचित्तपो" इति न्यायस्तु ना-श्रितः। अत्र केवलाकारोच्चारणे उत्तरत्र ककाराकारयोरुच्चारणे गौरवादिति भावः॥ **सन्निपातेति।** न च दीर्घेणैव स निव-र्त्तितः। दीर्घेऽप्यलजाति सम्बन्धसत्त्वेन न तथा सन्निपातच्युतिः। लोपेतु तस्यापि निवृत्तेस्तद्विरोधस्य स्पष्टत्वादिति भावः॥ परेतु जातिपक्षे तपरसूत्रं व्याप्यजातिनिर्देशस्यैव बोधकमिति यत्ननिमित्त-

---

१ "वालेरण्टाइन" मुद्रापितकैयटपुस्तके "समुदायकार्ये च पारतन्त्र्यात्" इति चकारघटितः पाठोऽस्ति॥

२ अवयवसदृशग्रहणं स्यात्॥ क॥ ३ भाष्ये॥

सन्निपातस्य दीर्घेण निवृत्तिर्जातेव न कस्याप्यनुवृत्तिस्तस्माद्याप्यत्व-जातियत्रादिसन्निपातनिमित्तो दीर्घो न स्वसन्निपातविघातक-लोपनिमित्तम्। सन्निपातपरिभाषायाश्च स्वप्रवृत्तेः प्राक् स्वनिमित्त-भूतो यादृशः सन्निपातः स्वातिरिक्तद्विघातकस्य स्वयमनिमित्त-मित्यर्थः। मात्राकालिकत्वसमानाधिकरणव्यापकजातिनिर्देशपचेऽप्य-ङ्गसंज्ञा तर्ह्यनिमित्तं स्यादिति **क्रन्मेजन्तसूत्र**वक्ष्यमाणभाष्यरीत्या यादेशनिमित्तसन्निपातस्य न लेशतोऽपि सत्तेति वदन्ति॥

प्रातर्ह्वतं तद्[1] लृकार इत्यादौ **रोरि तोर्लीति** तु नापा-दितं तस्याभितोऽज्भागसत्त्वेन तेन व्यवधानात्तदप्राप्तेः॥ **अग्ने इन्द्रे-**त्यादौ सवर्णदीर्घव्यावृत्तये आह **सामान्येनेति। गोद्यचो-ऽसङ्ख्येति** गोग्रहणं **नौद्यचष्टन्निति** नौग्रहणम्। **वर्णावयवा-श्रयकार्याभावस्येति**। वर्णावयवेषु भेदेनाप्रतिभासमानेषु वर्णा-श्रयकार्याभावस्येत्यर्थः। तेन मातृणामित्यादौ णत्वादिसिद्धिः। भेदेन प्रतिभासात् सामान्यापेक्षज्ञापकं विनापि न्यायेन निर्वाह-माह भाष्ये **अयन्विति॥ अभिन्नबुद्धिविषयस्येत्यस्य** व्याख्या **एकत्वालम्बनज्ञानग्राह्यस्येति॥ समुदायस्य योऽवयव इति**। वर्णसमुदायस्येत्यर्थः॥ **व्यधिकरणे इति**। सामानाधि-करण्येनान्वयेऽव्यपवृक्तस्येति व्यर्थं सर्वस्याप्यवयवस्यावयविनाऽव्यप-वृक्तत्वादितिभावः[2]॥ भाष्ये **अवयवाश्रयः**। अवयवसदृशस्वतन्त्र-वर्णाश्रयः। उक्तेऽर्थे युक्तिमाह **नहीति॥**

---

१ तत् लृकारः॥ इ॥ २ आत्वाद्यभाव॥ क॥

ननु समिधेनीशब्दस्य ऋचि प्रकृत्वे **न [1]काष्ठमग्नावाधीयत** इति भाष्यमयुक्तमत आह **साहचर्यादिति**। तदाधेयत्वे नेति भावः॥ **तच्च सप्तदशेति**। यद्यप्येकैका समिदरत्निमात्रमिति मिलितानां सप्तदशानां समिधां सप्तदशारत्निमात्रत्वं भवति एकस्यापि तावत्त्वमस्ति तथाप्यव्यपवृक्तस्य[2] समुदायावयवत्वाद् नव्यपवृक्ताश्रयकार्यप्रसंग इति भावः॥ न ह्यव्यपवृक्तत्वमात्रनिबन्धनं तदनाधानं किन्तु असम्भवनिबन्धनमित्याह भाष्ये **विषम इति**। आहितपुनर्ग्रहणस्य निषिद्धत्वादेकस्य काष्ठस्य प्रत्यृचमाधानं न सम्भवतीति भावः। युक्त्यन्तरमाह [3]**असम्भवश्चेति**। तमुपपादयति **अर्धचतुर्हस्तेति**। अर्धेन चतुर्हस्तेति तृतीयातत्पुरुषः। समिधोऽग्निवेदिबर्हिर्भावनिषेधाच्चासंभव इति भावः॥

अव्यपवृक्तमिति। अर्थाभावेऽव्ययीभावस्तदाह **व्यपवर्गस्येति**॥ वस्तुतस्तत्पुरुष एवायम्। व्यपवृक्तभिन्नतैलमांसरूपा गावः सर्षपास्त्वित्यर्थः। नञाव्ययीभावस्याभावादित्यग्रे वक्ष्यते। भाष्ये **कामचार इति**। स्वर्गे कामचारस्तेन ग्रौचाभाव इत्यर्थः॥ एङोः संश्लिष्टावर्णत्वेन व्यपवर्गस्यास्पष्टत्वात्सन्ध्यक्षरयोर्ग्रहणमैजभिप्रायमित्याह **ऐ औ इति**॥ **अकारस्येति**। यद्यप्येचो विवृततमास्तथापि विवृततरत्वमस्त्येवेति भावः। प्रयत्नभेदादेव एङैचोः परस्परं सावर्ण्याभावः। एङो विवृततरत्वादैचां विवृततमत्वादिति बोध्यम्॥

---

१ "काष्ठमग्नावभ्याधीयते" इत्यपि पाठोऽस्ति॥

२ तथाप्यव्यपवृक्तसमुदायावयवत्वात्॥ इ॥ ३ भाष्ये॥

नुडादीति। आनृजे इत्यत्र नुट्। आदिना चक्रुपे इत्यत्र लत्वं मातृणामित्यादौ णत्वं चेति बोध्यम्॥

सादृश्याच्चेति चस्त्वर्थे॥ **समुदाये** सन्ध्यक्षरादौ। सत्यपि गोसादृश्ये गवये गोत्वस्येव सन्ध्यक्षराद्यवयवेषु अत्वादिजातेरभावादकारादिग्रहणेन ग्रहणं नेतिभावः। ऐकारादीनामेकेच्छाप्रयत्नजन्यत्वेनैकत्वमेव अकारादिवत्। अत एवैषां पदवन्न वर्णसमूहत्वेन प्रतिभास इति तदेवाह **समुदायवाच्च इति**॥ **भ्रान्तिवशादिति**। भ्रान्तिगृहीतावयवसद्भावाश्रयेणेत्यर्थः॥ एवंच भ्रान्तिरेव ग्रहणपक्षबीजमिति भावः। अत एव गो नौ ग्रहणं चरितार्थम्। [१]**विनामो** णत्वम्। ननु विकरणविशेषनिर्देशेन आविकरणनिवृत्त्यर्थं सूत्रं स्यादत आह **नत्वश्रातिरेवेति**॥ तथाहि सति नाश्र इत्येव वदेदिति भावः॥ **नियमज्ञापकस्य**। नियमबोधकस्य॥ नन्वखण्डवर्णपक्षे ऋकारप्रश्लेषेऽपि कथं सिध्यतीत्यत आह **तच्च ऋकारेति**। एवं च रेफपदेन तत्सदृश आरोपितरेफत्ववानपि गृह्यत इति फलितम्॥

मात्रशब्दः सामान्याभिप्राय इत्याह **जातीति**। जातिश्चावयवानवयवसाधारणीत्याशयेनाह **ततश्चेति**। एवं विधाच्च रत्वलत्वजातिरेवेत्यतिप्रसङ्गो न। स्थान्यादेशभावस्य जातेर्व्यक्तिद्वारको बोध्यः। वस्तुतः स्फोट एव श्रोत्रग्राह्यः। वायुनिष्ठा रत्वादिना च तस्याभिव्यक्तिः। एवं च साक्षाद्रत्ववतोऽभावे न कल्पत इत्यत्राप्रवृत्तावस्य वैयर्थ्यापत्तिः। एवं च रेफावभासिनः स्फोटस्य प्रसङ्गे

---

१ भाष्ये॥

लकारावभासः स्फोट इत्यर्थः। एवं च ॡपावपि तत्प्रवृत्तिः सम्भवत्येव। तत्रापि रेफावभास सत्त्वात्। आकारादौ तु नैवं ह्रस्वाद्यवभास इति न तत्राकारावभासप्रयुक्तकार्यापत्तिः। तदुक्तं [1]**श्रुतेरित्यादि**। यत्तु स्वतन्त्रास्वतन्त्रसाधारणजातिपरतयैतद्भाष्यव्याख्यानं तन्न। तादृग्जातौ मानाभावात्। नरसिंहदृष्टान्तानुपपत्तेश्च। सादृश्यात्तु प्रत्यभिज्ञेत्यादिस्वोक्तिविरोधापत्तेश्च। किं चैवं सति रजातेरित्येव भगवान्वदेत्। किं च तादृग्जातिसत्त्वे वर्णैकदेशानामपि तज्जातिमत्त्वेन वर्णग्रहणेन ग्रहणपक्षस्यैव सिध्या ग्रहणपक्षमुत्क्रास्यवा न **गृह्यन्ते**[2] इति पक्षे तत्समाधानपरमाष्यासंगतेः। अत एवाष्टमे **रषाभ्यामिति** सूत्रे यथा नरसिंहावयवानां नरत्वसिंहत्वजातियोगाभावात्पुरुषसृगराजाभ्यामेकाकृतियोगाभाव एवं वर्णवर्णैकदेशयोरपीति कैयट आहेति वदन्ति॥

ऋकारेणेति। ऋकारावयवस्य रेफस्येव तदज्भागस्यापि केनचिदकारादिना ग्रहणादट्त्वमिति मन्यते॥ **जात्यभिव्यक्तीति**। अत्वादिजातीत्यर्थः॥ एवं च न केनाप्यत्र तद्ग्रहणमिति भावः। अत्र जात्यभिव्यक्तिहेतुत्वाभावे स्फुटप्रतिभासविषयत्वं हेतुः। **चो** हेतौ। अतो न सिध्यतीत्यर्थः॥ नन्वाकारादिभिर्व्यवायेऽपि न स्यादाचरसमाम्नायिकत्वाभावादत आह **आकारादयोऽपीति**॥ **भक्तिस्त्विति**। असवर्णत्वादनुपदेशाच्चेति भावः। भाष्ये **नूनमनशब्दमिति**। संज्ञाभूतमित्यभिप्रायः। गन्धर्वगानमित्यादौ सुवुत्पत्तेः पूर्वं समासेऽपि णत्ववारणायाखण्डपदे

---

१ भाष्ये॥ २ न गृह्यत इति पक्षे॥ सं॥

दृत्यर्थकसमानपदे दृत्यत्र पदस्यार्थबोधकस्यैव ग्रहणेन सखण्डत्वे असंज्ञायां णलप्राप्त्यभावादिति बोध्यम्। क्रन्दसृदित्यस्य तु नात्र प्राप्तिः। ईदृशे विषयेऽवग्रहाभावादित्याशयः। [1]**बहिरङ्गा वृद्धिरिति**। त्रिपाद्यामपि बहिरङ्गपरिभाषा प्रवर्त्तत इति वार्तिकमतेनैतत्। भाष्यमते तु हृग्रोति ग्रब्दपाठस्यैव ज्ञापकता बोध्या॥ [2]**ऋतो नो ण इति**। मातृणामित्यादौ दीर्घस्य बहिरङ्गासिद्धत्वाण्त्वम्। यद्वा प्रग्रास्तृणामिति निर्देशाण्त्वम्। अत्र तपरत्वं मुखसुखार्थमेव। उत्तरत्राप्येवमेव फलाभावात्। ध्वनितं चेदं वृत्तौ॥

ननु गुर्ववयवटेरित्यर्थाङ्गीकारे गुरूपटेः सुतो नस्यादत आह **तन्त्रेति**। स्थानषष्ठ्यन्तावयवषष्ठ्यन्तयोर्गुरुशब्दयोरित्यर्थः। गुर्ववयवटिश्चैव एव संभवति नान्यस्य आकारादेः। तदवयवस्य व्यपदेशकत्वाभावादिति भावः॥ **अचत्वाभावादिति**। तन्मूलटि[3]त्वाभावाच्चेत्यपि बोध्यम्॥ **संयोग इति**। संयोग संज्ञार्ह इत्यर्थः॥ **तस्यैकवर्णत्वमिति**। एवं च संयोगसंज्ञा न स्यादिति भावः। **संयोगे इति** भाष्यं तु संयोगार्ह इत्यर्थपरमिति तात्पर्यम्॥ **शिष्टसमाचारः**। शिष्टव्यवहारः॥ भाष्ये **माचाकालोऽचेति** बहुव्रीहिः संयोगोऽन्यपदार्थः। माचिकव्यञ्जनाभावेऽनुपदिष्टत्वं हेतुः। कुक्कुट इत्याद्युच्चारणं तु न उपदेशः। अनुपदिष्टत्वन्नाम अक्षरसमाम्नायेऽपठितत्वं ग्राहकशास्त्रेणागृहीतत्वञ्च। अनुपदिष्टं सत् सत्त्वेन कथं ग्राह्यं विज्ञातुमित्यर्थः। एवं चानुपदिष्टस्यासत्त्वात्

---

१ भाष्ये॥ २ भाष्ये। ३ तन्मूलत्वाभावात्॥ क॥

तत्प्रतिपत्तिरशक्येत्याह [१]**असच्चेति** ॥ क्वचित्त्वसच्चेत्यादिग्रन्थो न दृश्यते। अनेन लकारापाठे तस्यासत्त्वशङ्कया तयोः सावर्ण्यविधिरप्यशक्य इति सूचितम्। **यच्चैतदस्तीति** भाष्ये **हलोऽनन्तरा** इत्यत्र यकारादिभिरस्य ग्रहणे हल्द्वयाभाव इति भावः ॥

सानुनासिकेति। अणुदित्त्वात्त्वं हि विद्यमानस्य लोकसिद्धस्य सवर्णस्य ग्राहकमेव न त्वप्रसिद्धसवर्णकल्पकमिति भावः ॥

हयवरट्। ५। नन्वयं हकार इत्यनेनैकत्वं हकारस्य सूचितमिति कथं तद्विरुद्धं **पूर्वश्चेत्यादि**ना भेदाश्रयणमत आह **पूर्वपरेति**। एतद्भाष्यादेकत्वं वर्णानामित्येव पक्षो भगवतः संमत इति ज्ञायते ॥ भाष्ये **यदि पुनरिति**। न चैवं परहकाराभावे लकारस्याप्यभावेन तन्त्राद्याश्रयणेन हलन्त्यमित्यत्रान्योऽन्याश्रयपरिहारो वक्ष्यमाणो विरुद्धेतेति वाच्यम्। रन्त्यं हरिति न्यासेन लन्त्यं हल् इति न्यासेन वा तत्परिहारात्। लाघवाभावेऽप्येवं कर्त्तुं शक्यं न वेत्येव विचारतात्पर्यात्। यद्वा हरन्त्यमित्यस्यैवावृत्त्या हर्बोधकसूत्रसमुदायान्त्यमित्यर्थः। परेतु परहकाराभावेऽपि ल् इत्येव सूत्रं कार्यं प्रातिशाख्यादिप्रसिद्धहलादिप्रत्याहारसिध्यर्थम्। [२]तदर्थं रान्तस्यापि शक्तिकल्पने गौरवात्। **हलन्त्यमित्यस्यावृत्त्या** हल्प्रत्याहारबोधकसूत्रसमुदायान्त्यमित्यर्थ इत्यदोष इत्याहुः ॥

[३]**अड्ग्रहणेष्विति**। अड् गृह्यते येषु सूत्रेष्वित्यर्थः।

---

१ भाष्ये। २ तदर्थेऽप्रन्तस्यापि शक्तिकल्पने। इ ॥ ३ भाष्ये ॥

शम्ष्ठोटीत्यस्योदाहरणाऽदाने बीजमाह हकारपरस्येति ॥ न च तत् ग्रहित्याहेत्युदाहरणसम्भवः। शास्त्रबोधितं सौचं च विहाय [१]हलामुच्चारणार्थाचं विनोच्चारणस्यासाधुत्वेन तादृशोदाहरणाभाव इत्याशयात्। अत्र च भाष्ये एतदुदाहरणाऽदानमेव मानम्। अतोऽटिदीर्घादटीत्युभयोरुदाहरणं [२]**महां हिस** इति। **अट्कुप्विति** सूत्रेऽपि ग्रहणफलमर्हणेति बोध्यम् ॥ **अश्त्वमपीति।** इदमिण्लस्याप्युपलक्षणम्। तेन लिलिहिढे इत्यादौ **विभाषेट** इति ढत्वविकल्पसिद्धिरिति केचित् ॥ भाष्ये **हश्चिचेति।** सिद्धान्तरीत्यानिर्देशः। इदानीं तु यश्चिचेति सूत्रम्। [३]**अहकाराणिस्युरिति**। अतस्तत्र हकारग्रहणं कर्त्तव्यमिति भावः ॥

अदाग्धामिति। घत्वस्यासिद्धत्वादिति भावः ॥ स्वरूपप्रतिपत्त्यर्थ एवायमक्षरसमाम्नाय इति भ्रमं वारयति भाष्ये [४]**यदि किञ्चिदिति। [५]तद्याचष्टे प्रयोजनार्थ इति।** शास्त्रीयप्रयोजनार्थः[६] ॥ एवञ्चाद्यहकारस्याग्निरोरपि प्रयोजनं सूचितम्। अत एव मह्मा हसन्तीति **पुंयोगादिति**[७] सूत्रे भाष्यप्रयोगः संगच्छते। एतेन पूर्वहकारोपदेशप्रयोजनवार्त्तिके न्यूनता परिहृता। **कर्त्तव्य इत्यस्य स्यादिति शेषः। उपदेशोऽनोच्चारणमात्रम्। अन्यत्रापि।** प्रत्याहारान्तरे सर्वथा हकारस्य द्वेधोपदेशः कर्त्तव्य इत्यत्रास्य तात्पर्यम् ॥

---

१ उच्चारणार्थाचं ॥ इ ॥ २ भाष्ये ॥ ३ भाष्ये ॥
४ भाष्ये कैयटे च "यदि च किञ्चिद्" इति पाठोऽस्ति ॥
५ तदेतद्याचष्टे ॥ क ॥ ६ इत्यर्थः ॥ क ॥ ७ पा—४।१।४८ ॥

दोषप्रयोजनेति। अन्यतरपक्षीयदोष एवान्यतरपक्षे प्रयोजनमिति बोध्यम्॥ **णकारोऽचेति**। स्थानेऽन्तरतमत्वादिति भावः॥ ननु रेफस्य सवर्णाभावात्कथमत्रानुनासिकोऽत आह **न ह्यचेति**॥ ननु द्विर्वेऽपि [1]**रो रीति** [2]**हलो यमामिति** वा [3]लोपान्न दोषोऽत आह **द्विर्वचन इति**॥ भाष्ये **ऽव्व्युपधादिति**। अव् इति लुप्तषष्ठीकम्। ननु पूर्वोपदेशे दग्धृण इत्यादौ यथा संज्ञानिर्वाहः कथमिति चेन्न। संज्ञाविधानसामर्थ्येन तच्च तद्भावितपक्षाश्रयणान्न दोषः॥

भाष्ये **रेफोष्मणामिति**। विजातीया[4] इति शेषः। तेन सजातीयेषु सत्स्वपि न दोषः॥ ननु माभूद्रेफस्य विजातीयः सवर्णस्तथाप्यनुनासिकविधौ सवर्णग्रहणाभावाद् अनुनासिकः स्यादेवेत्यत आह **अनुनासिकपरेति**॥ **न हि रेफस्येति**। न च रेफस्य णकारः स्थानेऽन्तरतमो भवत्येवेति वाच्यम्। [5]**स्थानेऽन्तरतमे** इति सप्तम्यन्तपाठे स्थानप्रयत्नोभयान्तरतमे सर्वे चिन्मात्रमित्यादौ चरितार्थोऽनुनासिकविधिः प्रयत्नासदृशे रेफे न प्रवर्त्तते इति भावात्॥ **नापीति**। यद्यपि अन्तरतमानन्तरतमयोः प्राप्तावन्तरतम एवेति स्थानेऽन्तरतम इत्यनेन नियमः। कुण्डं रथेनेत्यादौ चानन्तरतमस्यैव प्राप्तिरितीदमयुक्तम्। तथापि सम्भवदनु-

---

१ पा—८।३।१४॥ २ पा—८।४।६४॥

३ हलो यमामिति लोपान्न दोषः॥ इ।क॥

४ विजातीय इति शेषः॥ सम्॥ ५ पा—१।१।५०॥

स्खारान्तरतमकेऽङ्कित इत्यादौ चरितार्थः परमवर्णविधौ रेफे न प्रवर्त्तते इति भावः। इदं जातिपक्षे इति केचित्। वस्तुतो व्यक्तिपक्षेऽपि तादृग्व्यक्तौ चरितार्थोऽस्यां व्यक्तौ न प्रवर्त्तत इति वक्तुं शक्यं तदुक्त्यतौ[1] **कोयणचौत्य**त्र कैयटः। द्रव्येऽपि पदार्थे उत्सर्गापवादभावः सन्दिग्धलाश्रयोऽस्त्येवेति। केचित्तु **स्थानेऽन्तरतम** इति सप्तम्यन्तपाठप्रत्याख्यानपरभाष्यविरोधेनास्यायुक्तेरसम्भवदुक्तिकत्वम्। किञ्चैवं सति उच्चग्रहणं भाष्ये व्यर्थं स्यात्। तस्मादनुनासिकविधौ सवर्णपदापकर्षपरं भाष्यं **रेफोष्मणामित्यस्य** चानुनासिकोऽनुस्खारान्तरतमस्य सवर्णानास्तीत्यर्थः॥ अत एव महिम्नानित्यादौ सूचरीत्यास्यानप्रयत्नोभयान्तरतम ऋकारसम्भवेऽपि नानुनासिकः। [2]**नाज्झलाविति** निषेधेन सवर्णत्वाभावादिति भाष्याशय इत्याहुः॥

नन्वयर्वादप्रसक्तद्विवस्य ह्रस्य ग्रहणमयुक्तमत आह **हकारवदिति**॥ ननु एककर्तृकयोर्भोजनपरिवेषणयोर्युगपदसम्भवाद् अस्तु तत्र बाधः। प्रकृते तु लक्ष्यभेदेन [3]भिन्नवाक्यावगतिनिमित्तकार्य्यिभावः किन्न स्यात्। यथावगतकार्यित्वस्यापि दको निमित्तत्वं दध्युदकादावत आह **तत्रेति**। लक्ष्यभेदेन कार्यित्वनिमित्तत्वसम्भवेऽपीत्यर्थः। सामान्यविशेषविध्योरेकवाक्यतायामित्यन्वयः॥

शब्दो वाक्यात्मा॥ **अर्थस्तदर्थः**॥ **सम्बन्धः**। प्रतिपाद्यप्रति-

---

१ पा – ६। १। ७७॥ २ पा – १। १। १०॥

३ भिन्नवाक्यावगतनिमित्तकार्य्यिभावः॥ क॥

पादकभावः॥ तेषां परिज्ञानम्। तद्यथा लोकव्यवहारादेव तथा तयोर्बाध्यबाधकभावः सम्भवेऽपि भवतीत्येतदपि लोकव्यवहारादेव ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यादिरूपादवगतमित्यर्थः। विशेषसन्निधाने सामान्यशब्दस्य तद्व्यतिरिक्तपरत्वञ्च तद्बीजम्। **परिज्ञानवदिति** पाठः। एवञ्च **अचो रहाभ्यामित्यत्र**[1] सामान्यविशेषविधित्वाभावेऽपि तत्र बाधे यद्बीजं तत्प्रकृतेऽप्यस्त्येवेत्याह **प्रत्यक्षश्चेति**। अविलम्बितप्रतीतिकत्वं प्रत्यक्षत्वम्। विलम्बिततत्कत्वञ्चानुमेयत्वम्॥ **लक्ष्येति**। ज्ञापकाल्लक्ष्यानुरोधाद्वा सत्यपि सामान्यविशेषभावे क्वचिद्बाधकत्वं विशेषविधेर्नाश्रीयते जातिव्यक्तिपक्षयोरुभयोरपीति भावः॥ **क्वचिदपेक्षा नास्तीति।** बाध्यबाधकभावस्येति शेषः॥ **यथेति।** बाध्यबाधकभावाभावे दृष्टान्तोऽयन्न तु कार्यित्वनिमित्तत्वयोः[2] समावेशे इति बोध्यम्॥

केचित्तु तक्रकौण्डिन्यन्यायोऽपि सामान्यविषयानाक्रान्तविषयाभावरूपानवकाशत्वमूलक एव। अस्ति च प्रकृते तत्। न ह्येतद्बोध्यनिमित्तत्वं सामान्यशब्दप्रयुक्तकार्यित्वानाक्रान्ते क्वचिदप्यस्ति सर्वत्राचः परत्वादनचीत्यस्य प्राप्तेरतो युक्तो लक्ष्यानुरोधात्सामान्येन कार्यित्वबाधः। न चैवमिको यणित्यादौ मत्वर्थ इत्यादौ सामान्यप्राप्तनिमित्तत्वाभावेन कार्यित्वस्य चारितार्थ्यादिति भाष्याभिप्रायमाहुः॥

ननु कार्यार्थ इत्यत्र कार्यं साधुत्वं चेत्। [3]**खरवसानयोरित्यादिना** सिद्धमत आह **विधानादिति॥ उपदिश्यन्त इति**

---

१ पा–८।४।४६॥ २ न तु कार्यित्वनिमित्तयोः॥ इ॥
३ पा–८।३।१५॥

पाठे भाष्ये वर्त्तमानसामीप्ये लट्। उपदिष्टा इत्यर्थः॥ **प्रवृत्तिनिमित्तेति** प्रकृते भासमानवैशिष्ट्यप्रतियोगिरूपः प्रकारस्तमर्थ इतिभावः। केन प्रवृत्तिनिमित्तेनायोगवाहशब्दवाच्यतैषामित्यत्र[1] तात्पर्यम्। **नन्वनुपदिष्टाश्चेति** चकारश्रवणादनुच्चारितत्वमयोगवाहशब्दस्य प्रवृत्तिनिमित्तान्तरमित्याभाति तदयुक्तम्। अनुपदेशपदार्थस्यानुच्चारणस्य तत्राभावात्। प्रयोगेष्वुच्चारितत्वात्। न च प्रत्याहारसूत्रानुच्चारितत्वं [2]तथा यदयुक्ता इत्यनेनैव तदर्थलाभेन पौनरुक्त्यापत्तेरत आह **अयुक्ता इत्यस्यैव हेतुकथनमिति।** प्रत्याहारबोधकलक्षणेनायुक्ता इत्यन्वयः॥ तद्व्याचष्टे **पाठाभावादिति।** ग्रहणकशास्त्रेण प्रदेशे प्रवर्त्तमानेन योऽवर्णस्तेषां ग्राहकस्य पाठाभावादित्यर्थः॥

एषां नास्तीति। अतोऽयुक्ता इत्यर्थः। एवञ्चाचरसमाम्नाये-ऽयुक्ता सन्तो वहन्ति प्रयोगं निर्वाहयन्तीत्ययोगवाहपदव्युत्पत्तिर्दर्शिता॥ **न पश्यत इति।** तत्र यत इत्यध्याहार्यमितिभावः॥ भाष्ये **उरः केणेति।** उरः कायतीति सुबुत्पत्तेः पूर्वं समासेऽपि सोऽपदादाविति न सत्वम्। [3]**पाशकल्पककाम्येष्वेव** तत् प्रवृत्तेः॥ ननु शरां जशो भवन्तीति लक्षणाभावात् शर्पुपाठस्य [4]जशभावः प्रयोजनमत आह **शर्पु पाठे इति॥**

---

१ वाच्यता तेषाम्॥ क॥ २ यथा पदयुक्ता॥ इ॥

३ वा – पा – ८। ३। ३८॥

४ शर्पुपाठस्य न जशभावः प्रयोजनम्॥ इ॥

यदीति। पूर्वत्र द्विर्वचने इत्यन्वयः॥ ननु पूर्वं द्वित्वे जश्त्वात्-पूर्वमेव हलादिः शेषे कथमुपधमानीयस्याभ्यासे जश्त्वं झश्परत्वाभावात्। [१]**अभ्यासे चर्चेत्य**नेनलाञ्जरतस्यात् प्रकृतिचराञ्चर एवेति उपधमानीय एव स्यादिति चेच्चिन्त्यमेवैतत्। उपधमानीयश्रवणापादनेनापि भाष्यसामञ्जस्यात्। [२]अन्ये तु द्वित्वे कृतेऽपि द्वित्वाश्रयस्य कार्ये कर्त्तव्येऽसिद्धत्वं[३] नेत्यपि पूर्वत्रासिद्धीयमित्यस्यार्थ इति परत्वात् जश्त्वे कृते एव [४]**हलादिः शेष** इत्याशयान्न दोषः॥ **द्विर्वचनं कथमिति**। बकाररहितस्येति शेषः॥ ननु निपातनाल्लक्षणमात्रं स्यान्न तु प्रदेशविशेषावच्छिन्नमत आह **अथापीति**॥ न [५]चाभ्युङ इत्यादौ दकारोच्चारणं सार्थकम्। नैतदुञे रूपमिति भाष्योक्त्या दोषाभावात्। उपतापातिरिक्तविषयेऽस्माद् घञ् नानभिधानादिति तदाशयः। अकुत्वविषये निपातनमिति पक्षान्तरे त्वाद्यमेव समाधानम्॥

अनुस्वारस्य यत्वादिति। यद्यपीण्कवर्गाभ्यामुत्तरो नुमा व्यवहितः सकारः सुहिन्सु इत्यादौ सम्भवति। तथापि तदनभिधानमिति भावः॥ **पुंस्त्वित्यत्र** [६]संपुंकानामित्येतत्प्रवृत्तिपरविवरणग्रन्थस्तु चिन्त्य एव तस्य [७]समः सुटि पुमः[८] खय्यम्परे [९]कानामेडिते इति सूत्रत्रयमात्रविषयत्वात्॥

---

१ पा–८।४।५४॥ २ अन्ये तु–॥इ॥क॥
३ कर्त्तव्ये सिद्धत्वं–॥इ॥ ४ प–७।४।६०॥ ५ भाष्ये–॥
६ वा–पा–७।३।६॥ ७ पा–८।३।५॥
८ पा–८।३।६। ९ पा–८।३।१२॥

ननु सूत्रविशेषानाश्रयणे तत्प्रत्याहारासंनिवेशात्कथं तन्निबन्धनकार्यप्रवृत्तिरत आह **प्रयोजनविशेषमिति ॥ अविशेषेणेति** भाष्यस्य प्रयोजनविशेषनिर्देशं विनेत्यर्थ इति भावः ॥ **यच्च यच्चेत्यादि ।** यद्यत्प्रयोजनसिद्धिरुद्देश्या तत्तद्विषयकसकलप्रयोजनोद्देशेनेत्यर्थः ॥ **जश्त्वे कृते संयोगसंज्ञायामिति ।** कार्यकालपक्षे इदम् ॥ भाष्ये **इदुदुपधस्येति ।** विसर्गस्यालत्वे ह्युपधात्वमिति भावः ॥

[1]**इदुदुपधस्य सकारस्येति ।** विसर्गस्यान्युपलक्षणमेतत् । अत एव निरोऽपि निष्कृतमिति सिध्यति । अत एव वक्ष्यमाणपक्षान्तरेणाविरोधः । [2]**निष्कृतमित्यादौ** सुबुत्पत्तेः पूर्वं समासेऽपि [3]**इणः ष** इति न । **पाशकल्पककाम्येष्वेव** तत्प्रवृत्तेः ॥ [4]**द्विर्वचनं प्रयोजनमिति ।** विसर्गजिह्वामूलीयादेर्द्विरुच्चारणे विशेषस्याग्रहादुच्चारणस्य कर्तुमशक्यत्वाच्च शास्त्रप्राप्तिमात्रेणैतत्प्रयोजनकथनमिति यन्तोष्टव्यम् ॥

ननु **सोऽपदादाविति**[5] सत्वस्य स्थानिवत्वं **पूर्वत्रासिद्धीये** इति निषेधान्नेत्यत आह **पूर्वत्रेति ॥** इमे इत्यनेन न हयवरट् सूत्रस्था एव गृह्यन्ते किं तु वर्णमात्रमित्याह **इदानीमिति ॥** [6]**अर्थवन्त** इति साध्यम् । [7]**वर्णा** इति पक्षः । पक्षतावच्छेदकमेव हेतुः । [8]**धातुप्रातिपदिकेत्यादिसु** दृष्टान्तः । **अनुत्पत्तिज्ञानम् ।** अनुत्पत्त्युपायज्ञानम् ॥

---

१ भाष्ये ॥ २ भाष्ये ॥ ३ पा – ८ । ३ । ३९ ॥ ४ भाष्ये ॥
५ पा – ८ । ३ । ३८ ॥ ६ भाष्ये ॥ ७ भाष्ये । ८ भाष्ये ।

भाष्ये **धातव** इत्यादि। प्रक्रियाश्रयप्रकृतिप्रत्ययानां वाचकत्वमित्येवं रूपवर्णस्फोटाश्रयेण। अयं च शास्त्रव्यवहारमात्रोपयोगी। एतद्वासनावशादेवलोकव्यवहारेऽपि शास्त्रज्ञास्तथा व्यवहरन्ति धर्मे चैवम्विधज्ञानस्योपयोग इति बोध्यम्॥ हेत्वन्तरमाह [1]**वर्णव्यत्यये चेति**॥ ननु कूपादौ न सिंहादाविव वर्णव्यत्ययोऽत आह **एकस्येति**॥ **तस्यैवान्वयेति**। ऊपग्रब्दस्य तु तदीयग्रक्त्युद्बोधकत्वरूपं द्योतकत्वं प्रादिवत्। अत एव तेषामिवैषामपि प्रातिपदिकसंज्ञापादनं करिष्यते॥

तृतीयहेतुमाह **वर्णानुपलब्धौ चेति**। [2]**अनर्थगतेरित्यस्य** तद्वर्णसत्तायां योऽर्थस्तदर्थानवगतेरित्यर्थ इत्याह **अर्थान्तरेति**॥ प्रश्नमुपपादयति भाष्ये **न साधीय इति**। नञ्रि काकुः॥ **परमतापेक्षयेति**। परेणानर्थगतेरित्युक्त्वादिहार्थगतिरस्तीत्यभ्युपगम्य परमते कटाक्षेण अन्यस्त्रीयार्थगत्यपेक्षयाचातिग्रयेनार्थगतिरस्तीति विवक्षेतिभावः॥ तच्छब्दार्थमाह **वर्णस्येति**। परे तु तच्छब्देन तद्वर्णघटितपरामर्शे न कश्चिद्दोषः॥ अत एव पूर्वं भाष्ये सकारेण कश्चिदर्थो गम्यत इत्युक्तमित्याहुः॥

लाघवे न तु कर्मधारयमाह भाष्ये **सोऽर्थ इति**। **प्रकृतोऽर्थः** तस्मिन्वर्णे सति योऽर्थः प्रतीयते स इत्यर्थः॥ ननु दृष्टान्ते सप्तम्युपमानपूर्वेति वचनेनोत्तरपदलोपेऽपि प्रकृते तच्छब्दलोपः केन। किञ्च तच्छब्द उत्तरपदमपि न नञ्रः समासाभावादत आह

---

१ भाष्ये॥ २ भाष्ये॥

Nyayabinduṭikā, (Text)	Rs. 0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-3 @ /6/ each	3	6
Padumawati Fasc. 1 and 2 @ 2/	4	0
Pariçiṣta Parvan, (Text) Fasc. 1-5 @ /6/ each	1	14
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-5 @ /6/ each	7	2
Parāçara, Institutes of (English)	0	12
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8. @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	2	4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 11-42 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9. Vol. II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-7 @ /6/ each	12	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1 & 2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc. 1-5 @ /6/ each	1	14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each	5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each	4	8
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1-6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1 to V	1	14
Tibetan Series.		
Pag-Sam Ṭhi S'iñ, Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1 to 4, @ 1/ each	12	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each	10	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1	0	12
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III Fasc. 1-5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	37	0
Ditto English Fasc, I-III @ 1/ each	3	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each	7	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngirī, (Text) Fasc. 1-3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol III, 1-10 Index to Vol. I Fasc. X & XI & Index to Vol. III, Fasc. XI & XII Index to Vol. II, Fasc. X, XI & XII @ /6/ each	13	2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each ...	Rs..	1	14
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each		5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 @ /12/ each		9	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each		7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1 and 2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each		1	14
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each		4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1 & 2 @ 1/8/ each		3	0
Wīs o Rāmīn. (Text) Fasc. 1–5 @ /6/ each		1	14
Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.		
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	General Cunningham's Archæological Survey Report for 1863–64 (Extra No., *J. A. S. B.*, 1864)	2	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J. A. S. B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J. A. S. B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J. A. S. B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Iṣṭilāḥāt-uṣ-Ṣūfīyah, edited by Dr. A. Sprenger, 8vo.	1	0
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
10.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
11.	Khizānatu-l-'ilm	4	0
12.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
14.	Sharaya-ool-Islām	4	0
15.	Tibetan Dictionary, by Csoma de Körös	10	0
16.	Ditto Grammar „ „	8	0
17.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
	Notices of Sanskrit Manuscripts, Fasc. 1–26 @ 1/ each	26	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

1-2-99.

Books are supplied by V-P. P.

PK
531
A15
1899
v.1
pt.1

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY